१८) अ सुधिया for शुद्धया । २१) अ ड तुष्टिपुष्टि°; ब आदाय । २२) अ °धमस्त्यक्त° । २३) अ °युक्तविवेचकः, ब युक्त्यायुक्त्यवि°, इ °युक्तविचारकः; इ °कुलितात्मना ।

तस्य प्रदर्शितं तत्त्वं प्रशान्तिजननक्षमम्[1] ।
जन्ममृत्युजराहारि [2]दुरापममृतोपमम् ॥२४

कालकूटोपमं मूढो मन्यते भ्रान्तिकारकम् ।
जन्ममृत्युजराकारि सुलभं हतचेतनः ॥२५

सो ऽज्ञानव्याकुलस्वान्तो भण्यते पित्तदूषितः ।
प्रशस्तमीक्षते सर्वमप्रशस्तं सदापि यः ॥२६

अन्याय्यं[1] मन्यते न्याय्यमित्थं यो ज्ञानवर्जितः ।
न किंचनोपदेष्टव्यं[2] तस्य तत्त्वविचारिभिः ॥२७

विपरीताशयो ऽवाचि भवतां पित्तदूषितः ।
अधुना भण्यते चूतः[1] सावधानैर्निशम्यताम् ॥२८

अङ्गदेशे ऽभवच्चम्पा नगरी विबुधार्चिता ।
दिवीव[1] स्वप्सरोरम्या [2]हृद्यधामामरावती ॥२९

---

२४) १. क उपशमोत्पादकम् । २. क दुःप्राप्यम् ।

२७) १. क अनीतम् । २. हिताहितम् ।

२८) १. आम्रच्छेदी ।

२९) १. स्वर्गे [इ] व । २. मनोहरा ।

उसके लिए अमृतके समान उत्कृष्ट शान्तिके उत्पन्न करनेमें समर्थ और जन्म, मरण व जराको नष्ट करनेवाला जो दुर्लभ वस्तुका यथार्थ स्वरूप दिखलाया जाता है उसे वह मूर्ख दुर्बुद्धि कालकूट विषके समान अशान्तिका कारण तथा जन्म, मरण एवं जराको करनेवाला सुलभ मानता है ॥२४-२५॥

जो अज्ञानसे व्याकुल चित्तवाला मनुष्य निरन्तर समस्त प्रशंसनीय वचन आदिको निन्द्य समझा करता है उसे पित्तदूषित कहा जाता है ॥२६॥

इस प्रकार जो अज्ञानी मनुष्य न्यायोचित बातको अन्यायस्वरूप मानता है उसके लिए तत्त्वज्ञ पुरुष कुछ भी उपदेश नहीं दिया करते हैं ॥२७॥

मैंने उपर्युक्त प्रकारसे आप लोगोंके लिए विपरीत अभिप्रायवाले पित्तदूषित पुरुषका स्वरूप कहा है। अब इस समय आम्रपुरुषके स्वरूपको कहता हूँ, उसे सावधान होकर सुनिए ॥२८॥

अंगदेशमें विद्वानोंसे पूजित एक चम्पानगरी थी। जिस प्रकार स्वर्गमें देवोंसे पूजित, सुन्दर अप्सराओंसे रमणीय, एवं मनोहर भवनोंसे परिपूर्ण अमरावती पुरी सुशोभित है उसी प्रकार उक्त देशके भीतर स्थित वह चम्पानगरी भी अप्सराओंके समान सुन्दर स्त्रियोंसे रमणीय और मनोहर प्रासादोंसे वेष्टित होकर शोभायमान होती थी ॥२९॥

---

२४) अ प्रशान्त° । २५) ब क ड इ मेने for मूढो; क ड इ तदासौ for मन्यते ; इ °चेतनम् । २६) अ पितृहर्षितः । २८) अ reads 31-32 after this verse । २९) ड हृद्यमानामरा° ।

विनम्रमौलिभिर्भूपै राजाभून्नृपशेखरः ।
तत्र सेव्यो ऽमरावत्यां[1] मघवानिव[2] नाकिभिः[3] ॥३०

सर्वरोगजराच्छेदि सेव्यमानं शरीरिणाम् ।
दुरवापं परैर्हृद्यं रत्नत्रयमिवार्चितम् ॥३१

रूपगन्धरसस्पर्शैः सुन्दरैः सुखदायिभिः ।
आनन्दितजनस्वान्तं दिव्यस्त्रीयौवनोपमम् ॥३२

एकमाम्रफलं तस्य प्रेषितं प्रियकारिणा[1] ।
राज्ञा वङ्गाधिनाथेन सौरभ्याकृष्टषट्पदम्[2] ॥३३॥ त्रिभिर्विशेषकम् ॥

जहर्ष धरणीनाथस्तस्य दर्शनमात्रतः ।
न कस्य जायते हर्षो रमणीये निरीक्षिते ॥३४

एकेनानेन लोकस्य कश्चिदाम्रफलेन मे ।
सर्वरोगहुताशेन संविभागो न जायते ॥३५

यथा भवन्ति भूरीणि[1] कारयामि तथा नृपः ।
ध्यात्वेति वनपालस्य समर्प्य न्यगदीदिति ॥३६

३०) १. चम्पायाम् । २. क इन्द्रः । ३. क सुरैः ।
३३) १. परममित्रभावेन । २. भ्रमरम् ।
३६) १. फलानि ।

जिस प्रकार अमरावतीमें देवोंसे आराधनीय इन्द्र रहता है उसी प्रकार उस चम्पा-नगरीमें नमस्कार करते समय मुकुटोंको झुकानेवाले अनेक राजाओंसे सेवनीय नृपशेखर नामका राजा था ॥३०॥

उस राजाके पास उसके हितैषी वंगदेशके राजाने सुगन्धिसे खेंचे गये भ्रमरोंसे व्याप्त एक आम्रफलको भेजा। जिस प्रकार जीवोंके द्वारा सेव्यमान दुर्लभ पूज्य रत्नत्रय उनके सब रोगों और जराको नष्ट किया करता है उसी प्रकार दूसरोंके लिए दुर्लभ, मनोहर और पूजाको प्राप्त वह आम्रफल भी प्राणियोंके द्वारा सेव्यमान होकर उनके सब प्रकारके रोगों एवं जराको दूर करनेवाला था; तथा जिस प्रकार दिव्य स्त्रीका यौवन सुन्दर व सुखप्रद रूप, गन्ध, रस और स्पर्शके द्वारा प्राणियोंके मनको प्रमुदित किया करता है उसी प्रकार वह आम्रफल भी सुन्दर व सुखप्रद अपने रूप, गन्ध, रस और स्पर्शके द्वारा मनुष्योंके अन्तः-करणको आनन्दित करता था ॥३१-३३॥

उसके देखने मात्रसे ही राजाको बहुत हर्ष हुआ। ठीक है—रमणीय वस्तुके देखनेपर किसे हर्ष नहीं हुआ करता है? सभीको हर्ष हुआ करता है ॥३४॥

समस्त रोगोंके लिए अग्निस्वरूप इस एक आम्रफलसे मेरे प्रजाजनको कोई विभाग नहीं किया जा सकता है, अतएव जिस प्रकारसे ये संख्यामें बहुत होते हैं वैसा कोई उपाय

---

३२) इ सुखकारिभिः । ३४) ब स जहर्ष । ३६) ब समर्थो for समर्प्य ।

यथा भवति भद्रायं चूतो भूरिफलप्रदः।
तथा कुरुष्व नीत्वा त्वं रोपयस्व वनान्तरे ॥३७

नत्वोक्त्वेवं करोमीति वृक्षवृद्धिविशारदः।
स[1] ऽग्रहीद्वृक्षमारोप्य वनमध्ये विधानतः ॥३८

सो ऽजायत महांश्चूतो भूरिभिः खचितः फलैः।
सत्त्वा[illegible]दकरः सद्यः सच्छायः सज्जनोपमः ॥३९

पक्षिणा नीयमानस्य सर्पस्य पतिता वसा[1]।
एकस्याथ तदीयस्य फलस्योपरि दैवतः ॥४०

तस्याः समस्तनिन्द्यायाः[1] संगेन तद[2]पच्यत।
नत्रान[illegible]रं हृद्यं जराया इव[3] यौवनम्[4] ॥४१

३८) १. वनपालः।

४०) १. गरल; क त्वक्।

४१) १. क त्वचः। २. क आम्रफलम्। ३. क यथा। ४. क पच्यते।

कराता हूँ; ऐसा सोचकर राजाने उसे वनपालको दे दिया और उससे कहा कि हे भद्र! जिस प्रकारसे यह आम्रफल बहुत फलोंको देनेवाला होता है वैसा कार्य करो—इसे ले जाकर तुम अपने किसी वनमें लगा दो ॥३५–३७॥

यह सुनकर वृक्षोंके बढ़ानेमें निपुण उस वनपालने राजाको नमस्कार करके उसे ले लिया और यह कहकर कि ऐसा ही करता हूँ, उसने उसे विधिपूर्वक वनके भीतर लगा दिया और बढ़ाने लगा ॥३८॥

इस प्रकारसे उस आम्र वृक्षने सज्जनके समान शीघ्र ही महानताका रूप धारण कर लिया—जिस प्रकार सज्जन बहुत-से फलोंसे—पूजा आदिसे प्राप्त होनेवाले स्वर्गादिके उत्पादक पुण्यसे—युक्त होता है उसी प्रकार वह वृक्ष भी बहुत-से आम्रफलोंसे व्याप्त हो गया था, जिस प्रकार सज्जन मनुष्य प्राणियोंको आनन्दित किया करता है उसी प्रकार वह वृक्ष भी प्राणियोंको आनन्दित करता था, तथा जिस प्रकार सज्जन समीचीन छाया (कान्ति) से सुशोभित होता है उसी प्रकार वह विशाल वृक्ष भी समीचीन छायासे सुशोभित था ॥३९॥

उस समय एक पक्षी सर्पको ले जा रहा था। भाग्यवश उसकी चर्बी उक्त आम्रवृक्षके एक फलके ऊपर गिर गयी ॥४०॥

सब प्रकारसे निन्दनीय उस चर्बीके संयोगसे वह नेत्रोंको आनन्द देनेवाला मनोहर फल इस प्रकारसे पक गया जिस प्रकारसे जराके संयोगसे यौवन पक जाता है ॥४१॥

३७) ब भद्रोयं। ३९) ब भूरिभी रचितः; ड इ स त्वाह्लाद°। ४१) ब जरया।

अपतत् तत्फलं क्षिप्रं विषतापेन तापितम् ।
अन्यायेनातिरौद्रेण महाकुलमिवार्चितम्[1] ॥४२
आनीय वनपालेन क्षितिपालस्य दर्शितम् ।
तत्पक्वं[1] तुष्टचित्तेन सर्वाक्षहरणक्षमम्[2] ॥४३
तन्माकन्दफलं[1] दुष्टं विषाक्तं[2] विकलात्मना ।
अदायि युवराजस्य[3] राज्ञा दृष्ट्वा मनोरमम् ॥४४
प्रसाद इति भाषित्वा तदादाय नृपात्मजः ।
चखादासुहरं[1] घोरं कालकूटमिव द्रुतम् ॥४५
स तत्स्वादनमात्रेण बभूव प्राणवर्जितः ।
जीवितं हरते कस्य दुष्टसेवा न कल्पिता[1] ॥४६
विपन्नं[1] वीक्ष्य राजन्यं राजा चूतमखण्डयत् ।
उद्यानमण्डनीभूतं कोपानलवितापितः[2] ॥४७

४२) १. क यथा अन्यायेन महाकुलं पतितम् ।
४३) १. आम्रफलम् । २. क सर्वेन्द्रियसुखकरम् ।
४४) १. आम्रफलम् । २. आलिप्तम् । ३. क पुत्रस्य ।
४५) १. क प्राणहरम् ।
४६) १. कृता ।
४७) १. क मृतम् । २. क सन् ।

विषके तापसे सन्तापको प्राप्त होकर वह फल शीघ्र ही इस प्रकारसे पतित हो गया—गिर गया—जिस प्रकार कि अतिशय भयानक अन्यायसे प्रतिष्ठित महान् कुल पतित हो जाता है—निन्द्य बन जाता है ॥४२॥

सब इन्द्रियोंको आकर्षित करनेवाले उस पके हुए फलको मनमें सन्तुष्ट बनपालने लाकर राजाको दिखलाया ॥४३॥

राजाने विकल होते हुए (शीघ्रतासे) विषसे व्याप्त उस दूषित मनोहर आमके फलको देखकर युवराजके लिए दे दिया ॥४४॥

तब राजपुत्रने 'यह आपका बड़ा अनुग्रह है' कहते हुए भयानक कालकूट विषके समान प्राणघातक उस फलको लेकर शीघ्र ही खा लिया ॥४५॥

उसके खाते ही वह राजपुत्र प्राणोंसे रहित हो गया—मर गया। ठीक है—की गयी दुष्टकी सेवा (दूषित वस्तुका उपभोग) भला किसके प्राणोंका अपहरण नहीं करती है? वह सब ही के प्राणोंका अपहरण किया करती है ॥४६॥

तब राजाने इस प्रकारसे मरणको प्राप्त हुए राजपुत्रको देखकर क्रोधरूप अग्निसे सन्तप्त होते हुए उद्यानकी शोभास्वरूप उस आम्रवृक्षको कटवा डाला ॥४७॥

४३) अ ब क इ तत्यक्तं । ४४) ब विकलरविकलात्मना; इ आदायि····राजा । ४५) इ प्रसादमिति ।
४७) अ °मण्डनं चूतं ।

कासशोषजराकुष्टच्छर्दिशूलक्षयादिभिः ।
रोगैर्जीवितनिर्विण्णा[1] दुःसाध्यैः पीडिता जनाः ॥४८
निशम्य विषमाकन्दं खण्डितं क्षितिपालिना ।
शावायाखादिषुः सर्वे प्राणमोक्षणकाङ्क्षिणः ॥४९
तदास्वादनमात्रेण सर्वव्याधिविवर्जिताः ।
अभूवन्निखिलाः सद्यो मकरध्वजमूर्तयः ॥५०
आकर्ण्य कल्यतां[1] राजा तानाह्वाय सविस्मयः ।
प्रत्यक्षीकृत्य दुश्छेदं विषादं तरसागमत् ॥५१
विचित्रपत्रैसंकीर्णः क्षितिमण्डलमण्डनः ।
सर्वाशवासकरश्चूतो यश्चक्रीव महोदयः ॥५२
दूरीकृतविचारेण कोपान्धीकृतचेतसा ।
निर्मूलकाषमुत्तुङ्गः स मया कषितः[1] कथम् ॥५३

४८) १. क खेदखिन्नाः ।
५१) १. नीरोगताम् ।
५२) १. वाहन ।
५३) १. क स्फेटकः ।

उस समय जो लोग खाँसी, शोष (यक्ष्मा), कोढ़, छर्दि, शूल और क्षय आदि दुःसह रोगोंसे पीड़ित होकर जीवनसे विरक्त हो चुके थे उन लोगोंने जब यह सुना कि राजाने विषमय आम्रके वृक्षको कटवा डाला है तब उन सबने मरनेकी इच्छासे उसके फलोंको लेकर खा लिया ॥४८-४९॥

उनके खाते ही वे सब शीघ्र उपर्युक्त समस्त रोगोंसे रहित होकर कामदेवके समान सुन्दर शरीरवाले हो गये ॥५०॥

जब राजाने उक्त वृक्षकी रोगनाशकता (या कल्पवृक्षरूपता) को सुना तो उसने उक्त रोगियोंको बुलाकर आश्चर्यपूर्वक प्रत्यक्षमें देखा कि उनके वे दुःसाध्य रोग सचमुच ही नष्ट हो गये हैं। इससे उसे वृक्षके कटवा डालनेपर बहुत पश्चात्ताप हुआ ॥५१॥

तब राजा सोचने लगा कि वह वृक्ष चक्रवर्तीके समान महान् अभ्युदयसे सम्पन्न था—जिस प्रकार चक्रवर्ती अनेक प्रकारके पत्रों (हाथी, घोड़ा एवं रथ आदि वाहनों) से सहित होता है उसी प्रकार वह वृक्ष भी अनुपम पत्रों (पत्तों) से सहित था, यदि चक्रवर्ती पृथिवीमण्डलसे मण्डित होता है—उसपर एकछत्र राज्य करता है—तो वह वृक्ष भी पृथिवीमण्डल-मण्डित था—पृथिवीमण्डलको सुशोभित करता था, तथा जिस प्रकार चक्रवर्ती मनुष्योंकी आशाओंको पूर्ण करता है उसी प्रकार वह वृक्ष भी उनकी आशाओंको पूर्ण करनेवाला था। इस प्रकार जो वृक्ष पूर्णतया चक्रवर्तीकी समानताको प्राप्त था उस उन्नत वृक्षको

४९) अ काङ्क्षिभिः । ५०) क ड इ अभवन् । ५१) ब क इ कल्पतां, ड कल्पिता; इ तानाहूय; इ प्रत्यक्षीकृतदुश्छेद्यं; क इ परमागमत् । ५२) अ °मण्डितः for °मण्डनः । ५३) अ कथितः, ब ड इ कर्षितः for कषितः ।

अविचार्यं[1] फलं दत्तं हा किं दुर्मेधसा[2] मया।
यदि दत्तं कुतश्छिन्नश्चूतो रोगनिषूदकः ॥५४
इत्थं वज्रानलेनेव दुर्निवारेण संततम्।
अदह्यत चिरं राजा पश्चात्तापेन मानसे ॥५५
पूर्वापरेण कार्याणि विदधात्यपरीक्ष्य यः।
पश्चात्तापमसौ तीव्रं चूतघातीव गच्छति ॥५६
अविचार्य जनः कृत्यं[1] यः करोति दुराशयः।
क्षिप्रं पलायते तस्य मनीषितमशेषतः ॥५७
निर्विचारस्य जीवस्य कोपव्याहतचेतसः।
हस्तीभवन्ति[1] दुःखानि सर्वाणि जननद्वये ॥५८
निर्विवेकस्य विज्ञाय दोषमित्थमवारणम्।
विवेको हृदि कर्तव्यो लोकद्वयसुखप्रदः ॥५९
क्षेत्रकालबलद्रव्ययुक्तायुक्तपुरोगमाः[1]।
विचार्याः सर्वदा भावा विदुषा हितकाङ्क्षिणा ॥६०

५४) १. कुमारस्य फलं किं दत्तम्। २. क दुर्बुद्धिना।
५७) १. वस्तु।
५८) १. हस्ते भवन्ति।
६०) १. प्रमुखाः।

क्रोधसे अन्धे होकर विवेक-बुद्धिको नष्ट करते हुए मैंने कैसे जड़-मूलसे नष्ट कर दिया। तथा मैंने दुर्बुद्धिवश कुछ भी विचार न करके उसके उस विपैले फलको राजकुमारको क्यों दिया, और यदि अविवेकसे दे भी दिया था तो फिर उस रोगनाशक आम्रवृक्षको कटवा क्यों दिया? ॥५२-५४॥

इस प्रकार वह राजा मनमें दुर्निवार वज्राग्निके समान उसके पश्चात्तापसे बहुत कालतक सन्तप्त रहा ॥५५॥

जो मनुष्य पूर्वापर विचार न करके कार्योंको करता है वह उस आम्रवृक्षके घातक राजाके समान महान् पश्चात्तापको प्राप्त होता है ॥५६॥

जो दुर्बुद्धि मनुष्य विना विचारे कामको करता है उसका अभीष्ट शीघ्र ही पूर्णरूपसे नष्ट हो जाता है ॥५७॥

जिस अविवेकी जीवका चित्त क्रोधसे हरा जाता है उसके दोनों ही लोकोंमें सब दुख हस्तगत होते हैं ॥५८॥

इस प्रकार अविवेकी मनुष्यके दुर्निवार दोषको जानकर हृदयमें दोनों लोकोंमें सुखप्रद विवेकको धारण करना चाहिए ॥५९॥

जो विद्वान् अपने हितका इच्छुक है उसे निरन्तर द्रव्य, क्षेत्र, काल, बल और योग्य-अयोग्य आदि बातोंका विचार अवश्य करना चाहिए ॥६०॥

५४) क °निषूदनः। ५५) अ क ड इ °नलेनैव। ५६) ब °त्यपरीक्ष्यया। ५८) अ °व्याहृतचेतसा, ड इ °व्यापृत°; अ °द्वयोः। ५९) अ विज्ञातम्। ६०) अ विचार्य।

मनुष्याणां पशूनां च परमेतद्विभेदकम् ।
प्रथमा यद्विचारज्ञा निर्विचाराः पुनः परे ॥६१
असूचि चूतघातीत्थं बहिर्भूतविचारिणः ।
सांप्रतं कथ्यते[1] क्षीरं श्रूयतामवधानतः ॥६२
छोहारविषये ख्याते सागराचारवेदकः[1] ।
वणिक् सागरदत्तो ऽभूज्जलयात्रा[2]परायणः ॥६३
उत्तीर्य सागरं नक्रमकरग्राहसंकुलम् ।
एकदा पोतमारुह्य चौलद्वीपमसौ गतः ॥६४
वाणी जिनेश्वरस्येव सुखदानपटीयसी ।
गच्छता सुरभिर्नीता तेनैका[1] क्षीरदायिनी ॥६५
गत्वा द्वीपपतिर्दृष्टो वणिजा तेन तोमरः ।
प्राभृतं पुरतः कृत्वा व्यवहारपटीयसा ॥६६
अन्येद्युः पायसीं[1] नीत्वा शुभस्वादां सुधामिव ।
तोमरो वीक्षितस्तेन कायकान्तिवितारणीम् ॥६७

६२) १. कथितः ।
६३) १. समुद्रशास्त्रस्य वेदकः । २. जलगमने ।
६५) १. गौः ।
६७) १. क क्षीरम् ।

मनुष्य और पशुओंमें केवल यही भेद है कि मनुष्य विचारशील होते हैं और पशु उस विचारसे रहित होते हैं ॥६१॥

इस प्रकारसे मैंने विचारहीन आम्रघाती पुरुषकी सूचना की है। अब इस समय क्षीर-पुरुषके स्वरूपको कहता हूँ, उसे सावधानतासे सुनिए ॥६२॥

छोहार देशमें समुद्र सम्बन्धी वृत्तान्तका जानकार (अथवा सामुद्रिक शास्त्रका वेत्ता) एक प्रसिद्ध सागरदत्त नामका वैश्य था। वह जलयात्रामें तत्पर हुआ ॥६३॥

एक समय वह जहाजपर चढ़कर नक्र, मगर और ग्राह आदि जल-जन्तुओंसे व्याप्त समुद्रको पार करके चौल द्वीपमें पहुँचा ॥६४॥

जाते समय वह अपने साथ जिनवाणीके समान सुखप्रद एक दूध देनेवाली कामधेनु (गाय) को ले गया ॥६५॥

वहाँ जाकर व्यवहारमें चतुर उस सागरदत्त वैश्यने भेंटको आगे रखते हुए उक्त द्वीपके स्वामी तोमर राजाका दर्शन किया ॥६६॥

दूसरे दिन उक्त वैश्यने अमृतके समान स्वादिष्ट और शरीरमें कान्तिको देनेवाली खीरको ले जाकर उस तोमर राजासे भेंट की ॥६७॥

६१) अ परैः । ६२) अ ब °विचारणः । ५३) अ ब चोहारविषये; अ स्यातः । ६४) अ ब चोचद्द्वीप° ।
६५) क इ °पटीयसा । ६७) अ वीक्ष्यतस्तेन; इ वितारिणीम् ।

संस्कृत्य[1] सुन्दरं दध्ना शाल्योदनमनुत्तमम् ।
दत्त्वा तेनेक्षितो ऽन्येद्युः पीयूषमिव दुर्लभम् ॥६८

अलब्धपूर्वकं भुक्त्वा मिष्टमाहारमुज्ज्वलम् ।
प्रहृष्टचेतसावाचि तोमरेण स वाणिजः ॥६९

वणिक्पते त्वया दिव्यं क्वेदृशं लभ्यते ऽशनम् ।
तेनावाचि ममेदृक्षं कुलदेव्या प्रदीयते ॥७०

भणितो म्लेच्छनाथेन तेनासौ वाणिजस्ततः ।
स्वकीया दीयतां भद्र ममेयं कुलदेवता ॥७१

वणिजोक्तं तदात्मीयां ददामि कुलदेवताम् ।
ददासि काङ्क्षितं द्रव्यं यदि द्वीपपते मम ॥७२

द्वीपेशेन ततो ऽवाचि मा कार्षीर्भद्र संशयम् ।
गृहाण वाञ्छितं द्रव्यं[1] देहि मे कुलदेवताम् ॥७३

मनीषितं ततो द्रव्यं गृहीत्वा वाणिजो गतः ।
समर्प्य नैचिकीं तस्य पोतेनोत्तीर्य सागरम् ॥७४

---

६८) १. क एकत्रीकृत्य ।

७३) १. द्रव्यम् ।

तत्पश्चात् किसी दूसरे समयमें उसने अमृतके समान दुर्लभ सुन्दर शाली धानके उत्कृष्ट भातको दहीसे संस्कृत करके उस राजाको दिया और उसका दर्शन किया ॥६८॥

तोमर राजाको इस प्रकारका उज्ज्वल मीठा भोजन पहले कभी नहीं मिला था, इसलिये उसे खाकर उसके मनमें बहुत हर्ष हुआ। तब उसने सागरदत्तसे पूछा कि हे वैश्यराज ! तुम्हें इस प्रकारका दिव्य भोजन कहाँसे प्राप्त होता है। इसके उत्तरमें सागरदत्तने कहा कि मुझे ऐसा भोजन कुलदेवी देती है ॥६९-७०॥

यह सुनकर उस म्लेच्छराज (तोमर) ने सागरदत्त वैश्यसे कहा कि हे भद्र ! तुम अपनी इस कुलदेवीको मुझे दे दो ॥७१॥

इसपर सागरदत्त बोला कि हे इस द्वीपके स्वामिन् ! यदि तुम मुझे मनचाहा द्रव्य देते हो तो मैं तुम्हें अपनी उस कुलदेवीको दे सकता हूँ, ॥७२॥

वैश्यके इस प्रकार उत्तर देनेपर उक्त द्वीपके स्वामीने कहा कि हे भद्र ! तुम जरा भी सन्देह न करो। तुम अपनी इच्छानुसार धन ले लो और उस कुलदेवताको मुझे दे दो ॥७३॥

तदनुसार सागरदत्त वैश्यने तोमरसे इच्छानुसार द्रव्य लेकर उस गायको उसे सौंप दिया। तत्पश्चात् वह जहाजसे समुद्रको पार करके वहाँसे चला गया ॥७४॥

---

६८) अ संसृत्य....तेनेक्षतो । ६९) ब मृष्टमाहार° । ७१) ब इ वणिजः । ७२) अ तवात्मीयं । ७३) अ वित्तं for द्रव्यं । ७४) ब वित्तं for द्रव्यं ।

तोमरेणोदितान्येद्युः पुरः पात्रं निधाय गौः ।
देहि तं दिव्यमाहारं वाणिजस्य ददासि यम् ॥७५

तेनेति भाषिता धेनुर्मूकीभूय व्यवस्थिता ।
कामुकेनाविदग्धेन[1] विदग्धेव विलासिनी ॥७६

अवदन्ती[1] पुनः प्रोक्ता यच्छ मे कुलदेवते ।
प्रसादेनाशनं दिव्यं भक्तस्य कुरु भाषितम् ॥७७

मूकीं दृष्ट्वामुनावादि प्रातर्दद्या ममाशनम् ।
स्मरन्तो श्रेष्ठिनो देवि त्वं तिष्ठाद्य निराकुला ॥७८

द्वितीये वासरे ऽवाचि निधायाग्रे विशालिकाम्[1] ।
स्वस्थीभूता ममेदानीं देहि भोज्यं मनोषितम् ॥७९

दृष्ट्वा वाचंयमीभूतां क्रुद्धचित्तस्तदापि ताम् ।
द्वीपतो घाटयामास[2] प्रेष्यकर्मकरानसौ[3] ॥८०

वीक्षध्वमस्य[1] मूढत्वं यो[2] नेदमपि बुध्यते ।
याचिता न पयो दत्ते गौः कस्यापि कदाचन ॥८१

७६) १. अज्ञानेन ।
७७) १. धेनुः ।
७९) १. स्थालीम् ।
८०) १. तोमरो निश्चलचित्तो ऽभूत् । २. क निःकासयामास । ३. क भृत्यान् ।
८१) १. तोमरस्य । २. तोमरः ।

दूसरे दिन तोमरने गायके आगे बरतनको रखकर उससे कहा कि जो भोजन तू उस वैश्यको दिया करती है उस दिव्य भोजनको मुझे दे ॥७५॥

उसके इस प्रकार कहनेपर वह गाय चुपचाप इस प्रकारसे अवस्थित रही जिस प्रकार कि मूर्ख कामीके कहनेपर चतुर स्त्री (या वेश्या) अवस्थित रहती है ॥७६॥

इस प्रकार गायको कुछ न कहते हुए देखकर राजाने फिरसे उससे कहा कि हे कुलदेवते ! प्रसन्न होकर मुझे दिव्य भोजन दे और भक्तके कहनेको कर ॥७७॥

उसको फिर भी मौन स्थित देखकर वह उससे बोला कि हे देवी ! तू आज सेठका स्मरण करती हुई निराकुलतासे स्थित रह और सबेरे मुझे भोजन दे ॥७८॥

दूसरे दिन वह उसके आगे विशाल थालीको रखकर बोला कि तू अब स्वस्थ हो गयी है, अतएव मुझे इस समय इच्छित भोजन दे ॥७९॥

उस समय भी जब वह मौनसे ही स्थित रही तब उसके इस मौनको देखकर तोमरके मनमें बहुत क्रोध हुआ। इससे उसने सेवकोंको आज्ञा देकर उसे द्वीपसे बाहर निकलवा दिया ॥८०॥

इस तोमरकी मूर्खताको देखो कि जो यह भी नहीं जानता है कि माँगनेपर गाय कभी किसीको भी दूध नहीं दिया करती है ॥८१॥

७५) अ तोमरेणोद्यता; क ड इ यत् for यम् । ७८) इ °र्दघात् । ७९) ब विशालिकम् । ८०) अ °चित्त-मदापि; इ द्वीपतोद्घाटयामास । ८१) क ड इ वीक्षध्व° ।

पयो ददानो [2]सुरभिर्निरस्ता[3] म्लेच्छेन मूढेन मुधा प्रशस्ता ।
अज्ञानहस्ते पतितं महार्घं पलायते रत्नमपार्थमेवं ॥८२

ददाति धेनुर्व्यवतिष्ठमानं[1] दुग्धं विधानेन विना न शुद्धम् ।
चामीकरं ग्रावणि विद्यमानं न व्यक्तिमायाति हि कर्महीनम् ॥८३

इदं कथं सिध्यति कार्यजातं[1] हानिं कथं याति कथं च वृद्धिम् ।
इत्थं न यो ध्यायति[2] सर्वकालं स दुःखमभ्येति[3] भवद्वये ऽपि ॥८४

यो न विचारं रचयति सारं माननिविष्टो मनसि निकृष्टः ।
म्लेच्छसमानो व्यपगतमानः स क्षतकार्यो बुधपरिहार्यः ॥८५

म्लेच्छनरेन्द्रो विपदमसह्यां गां नयति स्म व्यपगतबुद्धिः ।
दोषमशेषं व्रजति समस्तो मूर्खमुपेतः स्फुटमनिवार्यम् ॥८६

८२) १. देयमाना । २. क गौः । ३. निःकासिता; क तिरस्कृता । ४. निरर्थकम् ।
८३) १. विद्यमानम् । २. क पाषाणे ।
८४) १. समूहम् । २. न विचारयति । ३. प्राप्नोति ।
८५) १. नष्ट ।

उस मूर्ख म्लेच्छने दूध देनेवाली उत्तम गायको व्यर्थ ही निकलवा दिया । ठीक है—अज्ञानी जनके हाथमें आया हुआ महान् प्रयोजनको सिद्ध करनेवाला रत्न व्यर्थ ही जाता है ॥ ८२ ॥

गाय अपने पासमें स्थित निर्मल दूधको प्रक्रिया (नियम) के बिना नहीं दिया करती है । ठीक है—पत्थरमें अवस्थित सोना क्रियाके बिना प्रकट अवस्थाको प्राप्त नहीं हुआ करता है ॥८३॥

यह कार्यसमूह किस प्रकारसे सिद्ध हो सकता है तथा इसके सिद्ध करनेमें किस प्रकारसे हानि और किस प्रकारसे वृद्धि हो सकती है, इस प्रकारका जो विचार नहीं करता है वह दोनों ही लोकोंमें निरन्तर दुखको प्राप्त होता है ॥८४॥

जो अधम मनुष्य अभिमानमें चूर होकर मनमें श्रेष्ठ विचार नहीं करता है वह उस म्लेच्छके समान गर्वसे रहित होता हुआ अपने कार्यको नष्ट करता है । ऐसे मनुष्यका विद्वान् परित्याग किया करते हैं ॥८५॥

उस बुद्धिहीन (मूर्ख) म्लेच्छ राजाने गायको असह्य पीड़ा पहुँचायी । ठीक है—जो जन मूर्खकी संगति करते हैं वे सब प्रकटमें उन समस्त दोषोंको प्राप्त होते हैं जिनका किसी भी प्रकारसे निवारण नहीं किया जा सकता है ॥८६॥

८२) अ ब सुधा for मुधा; अ ब महार्थं । ८४) ब क ड इ कथं विवृद्धिम् ।
८६) ब °मसह्यामानयति....मूर्खमपेतः....°मविचार्यम्, इ °वार्यः ।

मौर्ख्यसमानं भवति तमो नो ज्ञानसमानं भवति न तेजः ।
जन्मसमानो भवति न शत्रुर्मोक्षसमानो भवति न बन्धुः ॥८७
उष्णमरीचौ तिमिरनिवासः शीतलभावो विषममरीचौ[1] ।
स्यादथ तापः शिशिरमरीचौ जातु विचारो भवति न मूर्खे ॥८८
श्वापदपूर्णं[1] वरमवगाह्यं कक्षमुपास्यो[2] वरमहिराजः ।
वज्रहुताशो वरमनुगम्यो जातु न मूर्खः क्षणमपि सेव्यः ॥८९
अन्धस्य नृत्यं बधिरस्य गीतं काकस्य शौचं मृतकस्य भोज्यम् ।
नपुंसकस्याथ वृथा कलत्रं मूर्खस्य दत्तं सुखकारि रत्नम् ॥९०
इयं कथं दास्यति मे पयो गौरिदं न यः पृच्छति मुग्धबुद्धिः ।
दत्त्वा धनं धेनुमुपाददानो म्लेच्छेन तेनास्ति समो न मूर्खः ॥९१
गृह्णाति यो भाण्डमबुध्यमानः पृच्छामकृत्वा[1] द्रविणं वितीर्य ।
मलिम्लुचानां[2] विपिने सशङ्के ददात्यमूल्यं ग्रहणाय रत्नम् ॥९२

८८) १. अग्नौ ।
८९) १. क वनचरजीव । २. वनम् ।
९२) १. परीक्षाम् । २. चौराणाम्; क पक्षे भिल्लानाम् ।

मूर्खताके समान दूसरा कोई अन्धकार नहीं है, ज्ञानके समान दूसरा कोई प्रकाश नहीं है, जन्मके समान दूसरा कोई शत्रु नहीं है, तथा मोक्षके समान अन्य कोई बन्धु नहीं है ॥८७॥

सूर्यकी उष्ण किरणमें कदाचित् अन्धकारका निवास हो जाये, अग्निमें कदाचित् शीतलता हो जाये, तथा चन्द्रमाकी शीतल किरणमें कदाचित् सन्ताप उत्पन्न हो जाये; परन्तु मूर्ख मनुष्यमें कभी भले-बुरेका विचार नहीं हो सकता है ॥८८॥

व्याघ्र आदि हिंसक पशुओंसे परिपूर्ण वनमें रहना उत्तम है, सर्पराजकी सेवा करना श्रेष्ठ है, तथा वज्राग्निका समागम भी योग्य है; परन्तु मूर्ख मनुष्यकी क्षण-भर भी सेवा करना योग्य नहीं है ॥८९॥

जिस प्रकार अन्धेके आगे नाचना व्यर्थ होता है बहिरेके आगे गाना व्यर्थ होता है, कौवेको शुद्ध करना व्यर्थ होता है, मृतक (मुर्दा) को भोजन कराना व्यर्थ होता है, तथा नपुंसकके लिए स्त्रीका पाना व्यर्थ होता है; उसी प्रकार मूर्खके लिए दिया गया सुखकर रत्न भी व्यर्थ होता है ॥९०॥

जिस मूर्ख म्लेच्छने उत्तम धन देकर उस गायको तो ले लिया, परन्तु यह नहीं पूछा कि यह गाय मुझे दूध कैसे देगी; उसके समान और दूसरा कोई मूर्ख नहीं है ॥९१॥

जो मूर्ख धनको देकर बिना कुछ पूछे ही वैश्यके धनको लेता है वह वनके भीतर अभीष्ट वस्तुके लेनेके लिए चोरोंको अमूल्य रत्न देता है, ऐसा मैं समझता हूँ ॥९२॥

८७) अ ब मूर्खसमानं; अ मूर्खसमानं भवति न तेजो जन्मसमानो न भवति शत्रुः । मोक्षसमानो न भवति बन्धुः पुण्यसमानं न भवति मित्रम् ; ब क न भवति शत्रु....न भवति बन्धुः । ८८) अ न भवति मूर्खे । ९०) ब नृत्तं । ९१) ब पश्यति for पृच्छति; इ मूढबुद्धिः; अ ब सारं for धेनुम् ; अ समानमूर्खः । ९२) ब भावमबुध्य; अ विपत्ते; क ड इ ददाति मूल्यं ।

मानं निराकृत्य समं विनीतैरज्ञायमानं परिपृच्छ्य सद्भिः।
सर्वं विधेयं[1] विधिनावधार्यं[2] ग्रहीतुकामैरुभयत्र सौख्यम् ॥९३

रागतो द्वेषतो मोहतः कामतः कोपतो मानतो लोभतो जाड्यतः।
कुर्वते ये विचारं न दुर्मेधसः पातयन्ते निजे मस्तके ते[1] ऽशनिम्[2] ॥९४

दुर्भेद्यदर्पाद्रिशिरोधिरूढः परं न यः पृच्छति दुर्विदग्धः।
द्वीपाधिपस्येव पयः पवित्रं रत्नं करप्राप्तमुपैति नाशम् ॥९५

विहितविनयाः पृष्ट्वा सम्यग्विचार्य विभाव्य ये
मनसि सकलं युक्तायुक्तं सदापि वितन्वते[1]।
प्रथितयशसो लब्ध्वा सौख्यं मनुष्यनिलिम्पयो[2]-
रमितगतयस्ते निर्वाणं श्रयन्ति निरापदः ॥९६

इति धर्मपरीक्षायाममितगतिकृतायां सप्तमः परिच्छेदः ॥७॥

---

९३) १. कार्यम्। २. करणीयम्।

९४) १. ते पुरुषा निजमस्तके वज्रं पातयन्ति ये दुर्मेधसः मूर्खाः विचारं न कुर्वते। २. क वज्रम्।

९६) १. कार्यं कुर्वन्ति। २. °देवयोः।

इसलिए जो सज्जन दोनों ही लोकोंमें सुखको चाहते हैं उन्हें मानको छोड़कर विनम्रतापूर्वक जिन कामोंका ज्ञान नहीं है उनके विषयमें पहले अनुभवी जनोंसे पूछना चाहिए और तब कहीं उन सब कामोंको नियमपूर्वक करना चाहिए ॥९३॥

जो दुर्बुद्धि जन राग, द्वेष, मोह, काम, क्रोध, मान, लोभ और अज्ञानताके कारण विचार नहीं करते हैं वे अपने मस्तकपर वज्रको पटकते हैं ॥९४॥

जो मूर्ख दुर्भेद्य अभिमानरूप पर्वतके शिखरपर चढ़कर दूसरेसे नहीं पूछता है वह चोच (या चोल) द्वीपके अधिपति उस तोमर राजाके हाथमें प्राप्त हुए पवित्र दूधके समान अपने हाथमें आये हुए निर्मल रत्नको दूर करता है ॥९५॥

जो प्राणी विनयपूर्वक दूसरेसे पूछकर उसके सम्बन्धमें भली भाँति विचार करते हुए मनमें योग्य-अयोग्यका पूर्वमें निश्चय करते हैं और तत्पश्चात् निरन्तर समस्त कार्यको किया करते हैं वे अपनी कीर्तिको विस्तृत करके प्रथमतः मनुष्य और देवगतिके सुखको प्राप्त करते हैं और फिर अन्तमें केवलज्ञानसे विभूषित होकर समस्त आपदाओंसे मुक्त होते हुए मोक्ष-पदको प्राप्त होते हैं ॥९६॥

इस प्रकार आचार्य अमितगति द्वारा विरचित धर्मपरीक्षामें
सातवाँ परिच्छेद समाप्त हुआ ॥७॥

---

९३) अ ब सदा for समं; अ विधिना विधिर्यो, ब क ड विधिना विधेयं। ९४) अ हि for न; इ घातयन्ते। ९५) अ दुर्मेद, ब दुर्भेदमर्थाद्रिमदाधिरूढः; अ ब तस्य for नाशम्; ड Om. this verse। ९६) अ निलम्पयो°; अ विरचितायां for कृतायां।

अथैवं कथितं क्षीरं प्राप्तं म्लेच्छेन नाशितम् ।
अवाप्याज्ञानिना ध्वस्तः सांप्रतं कथ्यते ऽगुरुः ॥१
मगधे विषये राजा ख्यातो गजरथो ऽजनि ।
अरातिमत्तमातङ्गकुम्भभेदनकेसरी ॥२
क्रीडया विपुलक्रीडो निर्गतो बहिरेकदा ।
दवीयः[1] स गतो हित्वा सैन्यं मन्त्रिद्वितीयकः ॥३
दृष्ट्वैकमग्रतो भृत्यं भूपो ऽभाषत मन्त्रिणम् ।
को ऽयं वा कस्य भृत्यो ऽयं पुत्रो ऽयं कस्य कथ्यताम् ॥४
मन्त्री ततो ऽवदद्देव ख्यातो ऽयं हालिकाख्यया ।
हरेर्महत्तरस्यात्र तनूजस्तव सेवकः ॥५
देवकीयक्रमाम्भोजसेवनं कुर्वतः सदा ।
द्वादशैतस्य वर्तन्ते वर्षाणि क्लेशकारिणः ॥६

३) १. दूरे ।
६) १. तव क्रमाम्भोज ।

तोमर म्लेच्छने प्राप्त हुए दूधको किस प्रकारसे नष्ट किया, इसकी कथा कही जा चुकी है। अब अज्ञानीने अगुरु चन्दनको पा करके उसे किस प्रकारसे नष्ट किया है, इसकी कथा कही जाती है ॥१॥

मगध देशके भीतर एक प्रसिद्ध गजरथ नामका राजा राज्य करता था। वह शत्रुरूप मदोन्मत्त हाथियोंके कुम्भस्थलको खण्डित करनेके लिए सिंहके समान था ॥२॥

क्रीड़ामें अतिशय अनुराग रखनेवाला वह राजा एक दिन उस क्रीड़ाके निमित्तसे नगरके बाहर निकला और सेनाको छोड़कर दूर निकल गया। उस समय उसके साथ दूसरा मन्त्री था ॥३॥

राजाने वहाँ आगे एक सेवकको देखकर मन्त्रीसे पूछा कि यह मनुष्य कौन है तथा वह किसका सेवक और किसका पुत्र है; यह मुझे कहिए ॥४॥

इसके उत्तरमें मन्त्री बोला कि राजन्! 'हालिक' इस नामसे प्रसिद्ध यह आपके प्रधान हरिका पुत्र व आपका सेवक है। कष्ट सहकर आपके चरण-कमलोंकी सेवा करते हुए इसके बारह वर्ष पूर्ण हो रहे हैं ॥५-६॥

१) ड °प्य ज्ञानिना । २) ब मगधाविषये, क ड मगधवि°; अ जगरथो, ब भीमरथो; क ड इ °म्भच्छेदन । ४) अ भाषति....ना for वा; ब कथ्यते । ५) ब °देव प्रसिद्धो हालि°.... °स्यापि । ६) अ क ड सतः for सदा ।

मन्त्री भूपतिनाभाणि विरूपं भवता कृतम् ।
भद्रेदं गदितं यन्न ममास्य क्लेशकारणम् ॥७
पदाति क्लिष्टमक्लिष्टं भो सेवकमसेवकम् ।
समस्तं मन्त्रिणा ज्ञात्वा कथनीयं महीपतेः ॥८
स्वाध्यायः साधुवर्गेण गृहकृत्यं कुलस्त्रिया ।
प्रभुकृत्यममात्येन चिन्तनीयमहर्निशम् ॥९
ततो भूपतिनावाचि हालिकस्तुष्टचेतसा ।
शङ्खराढाभिधं भद्र मटम्बं स्वीकुरूत्तमम् ॥१०
युक्तं भद्र गृहाणेदं ग्रामैः पञ्चशतप्रमैः ।
ददानैर्वाञ्छितं वस्तु कल्पवृक्षैरिवापरैः ॥११
हालिकेन ततोऽवाचि निशम्य नृपतेर्वचः ।
किं करिष्याम्यहं ग्रामैरेकाकी देव भूरिभिः ॥१२
ग्रहीतुं तस्य[1] युज्यन्ते दीयमानाः सहस्रशः ।
ग्रामाः पदातयो यस्य विद्यन्ते प्रतिपालकाः ॥१३
स ततो गदितो राज्ञा भद्र ग्रामैर्मनोरमैः ।
विद्यमानैः स्वयं भृत्या भविष्यन्ति प्रपालकाः ॥१४

१३) १. हे राजन्, तस्य पुरुषस्य ।

इस उत्तरको सुनकर राजाने मन्त्रीसे कहा कि हे सत्पुरुष ! आपने इसके उस क्लेशके कारणको जो मुझसे नहीं कहा है, यह विरुद्ध कार्य किया है—अच्छा नहीं किया। भो मन्त्रिन् ! कौन सैनिक क्लेश सह रहा है और नहीं सह रहा है तथा कौन सेवाकार्यको कर रहा है और कौन उसे नहीं कर रहा है, इस सबकी जानकारी प्राप्त करके मन्त्रीको राजासे कहना चाहिए। साधुसमूहको निरन्तर स्वाध्यायका, कुलीन स्त्रीको गृहस्वामी (पति) के कार्यका तथा मन्त्रीको सदा राजाके कार्यका चिन्तन करना चाहिए॥७-९॥

तत्पश्चात् राजाने मनमें हर्षित होकर उस हालिकसे कहा कि हे भद्र ! मैं तुम्हें शंखराढ नामके मटम्ब (५०० ग्रामोंमें प्रधान—ति. प. ४-१३९९) को देता हूँ, तुम उस उत्तम मटम्बको स्वीकार करो। हे भद्र ! दूसरे कल्पवृक्षोंके ही समान मानो अभीष्ट वस्तुको प्रदान करनेवाले पाँच सौ ग्रामोंसे संयुक्त इस मटम्बको तुम ग्रहण करो॥१०-११॥ राजाके इस वचनको सुनकर हालिक बोला कि हे देव ! मैं अकेला ही हूँ, अतएव इन बहुत-से ग्रामोंके द्वारा मैं क्या करूँगा ? इस प्रकारसे दिये जानेवाले हजारों ग्रामोंका ग्रहण तो उसके लिए योग्य हो सकता है जिसकी रक्षा करनेवाले पादचारी सैनिक विद्यमान हैं॥१२-१३॥

यह सुनकर राजाने उससे कहा कि हे भद्र ! उन मनोहर ग्रामोंके आश्रयसे सब ग्रामोंकी रक्षा करनेवाले सेवक स्वयं हो जायेंगे। इसका कारण यह है कि ग्रामोंके आश्रयसे धन उत्पन्न

८) ड क्लिष्टम°; अ °माक्लिष्टं; ब वा for भो। १०) क ड इ संकराटाभिधं; ब नाम for भद्र; इ मठं त्वं स्त्री°। ११) क ड गृहाणेमं; ड °शतक्रमैः। १२) ड इ निशम्य वचनं नृपः। १४) अ क स्वयं भृत्या भविष्यन्ति, सर्वग्रामप्रपालकाः।

ग्रामेभ्यो जायते द्रव्यं द्रव्यतो भृत्यसंपदः[1] ।
भृत्यैर्निषेव्यते राजा द्रव्यतो नोत्तमं परम् ॥१५
कुलीनः पण्डितो मान्यः शूरो न्यायविशारदः ।
जायते द्रव्यतो मर्त्यो विदग्धो धार्मिकः प्रियः ॥१६
योगिनो वाग्मिनो[1] दक्षा वृद्धाः शास्त्रविशारदाः ।
सर्वे द्रव्याधिकं भक्त्या सेवन्ते चाटुकारिणः ॥१७
विशीर्णाङ्घ्रिकरघ्राणं कुष्ठिनं द्रविणेश्वरम् ।
आलिङ्ग्य शेरते रामा नवयौवनभूषिताः ॥१८
सर्वे कर्मकरास्तस्य सर्वे तस्य प्रियंकराः ।
सर्वे वशंवदास्तस्य द्रव्यं यस्यास्ति मन्दिरे ॥१९
बालिशं शंसति[1] प्राज्ञः शूरो भीरुं निषेवते ।
पापिनं धार्मिकः स्तौति संपदा सदनीकृतम् ॥२०
चक्रिणः केशवा रामाः सर्वे ग्रामप्रसादतः ।
परासाधारणश्रीका गौरवं प्रतिपेदिरे[1] ॥२१

१५) १. गजादयः ।
१७) १. क पण्डिताः ।
२०) १. सदसि ।
२१) १. प्राप्नुवन्ति ।

होता है, धनके निमित्तसे सेवकरूप सम्पत्ति होती है, और सेवकोंके द्वारा राजा होकर सेवित होता है। ठीक है, धनसे उत्कृष्ट और दूसरा कुछ भी नहीं है—लोकमें सर्वोत्कृष्ट धन ही है ॥१४-१५॥

मनुष्य धनके आश्रयसे कुलीन, विद्वान्, आदरका पात्र, पराक्रमी, न्यायनिपुण, चतुर, धर्मात्मा और सबका स्नेहभाजन होता है ॥१६॥

योगी, वचनपटु, चतुर, वृद्ध और शास्त्रके रहस्यके ज्ञाता; ये सब ही जन खुशामद करते हुए धनिककी भक्तिपूर्वक सेवा किया करते हैं ॥१७॥

लक्ष्मीवान् पुरुषके पाँव, हाथ और नासिका यदि सड़-गल भी रही हों तो भी नवीन यौवनसे सुशोभित स्त्रियाँ उसका आलिंगन करके सोती हैं ॥१८॥

जिसके घरमें सम्पत्ति रहती है उसके सब ही जन आज्ञाकारी, सब ही उसके हितकर और सब ही उसकी अधीनताके कहनेवाले—उसके वशीभूत—होते हैं ॥१९॥

जिसको सम्पत्तिने अपना घर बना लिया है—जो सम्पत्तिका स्वामी है—वह यदि मूर्ख भी हो तो उसकी विद्वान् प्रशंसा करता है, वह यदि कायर हो तो भी उसकी शूर-वीर सेवा किया करता है, वह पापी भी हो तो भी धर्मात्मा उसकी स्तुति करता है ॥२०॥

चक्रवर्ती, नारायण (अर्धचक्री) और बलभद्र ये सब ग्रामोंके प्रसादसे—ग्राम-नगरादिकोंके स्वामी होनेसे—ही अनुपम लक्ष्मीके स्वामी होकर महिमाको प्राप्त हुए हैं ॥२१॥

१५) अ भृत्यैर्निवेदितो । १७) अ भव्या for शास्त्र; ब द्रव्याधिपम् । २०) क शंसदि । ब संपदाम् ।

ततो ऽजल्पीदसौ देव दीयतां मे प्रसादतः ।
क्षेत्रमेकं सदाकृष्यं वृक्षकूपविवर्जितम् ॥२२
ततो ऽध्यासीन्नृपो[1] नायमात्मनो बुध्यते हितम् ।
विद्यते धिषणा[2] शुद्धा[3] हालिकानां कुतो ऽथवा ॥२३
उक्तो मन्त्री ततो राज्ञा जीवतादेष दीयताम् ।
क्षेत्रमागुरवं भद्र काष्ठं विक्रीय वपुंटः[1] ॥२४
अदर्शयत्ततो मन्त्री क्षेत्रं तस्यागुरुद्रुमैः ।
इष्टवस्तुप्रदैः कीर्णं कल्पपादपसंनिभैः ॥२५
ततो ऽध्यासीदसावेवमहो राजैष तुष्टिकः ।
अदत्त कीदृशं क्षेत्रं व्याकीर्णं विविधैर्द्रुमैः ॥२६
पौलस्त्यं[1] मञ्जनच्छायं[2] विस्तीर्णं निरुपद्रवम् ।
छिन्नं भिन्नं मया क्षेत्रं याचितं दत्तमन्यथा ॥२७

---

२३) १. चिन्तितवान् । २. बुद्ध्या । ३. निर्मला विवेकपरायणाः ।
२४) १. वराक बापडो ।
२७) १. कोमलम् ; क स्निग्धम् । २. कृष्णम् ।

राजाके उपर्युक्त वचनोंको सुनकर हालिक बोला कि हे देव ! आप कृपा कर मुझे एक ऐसा खेत दे दीजिए जो सदा जोता व बोया जा सकता हो तथा वृक्षों एवं झाड़ियोंसे रहित हो ॥२२॥

इसपर राजाने विचार किया कि यह अपने हितको नहीं समझता है। अथवा ठीक भी है, हल चलानेवाले पामरोंके भला निर्मल बुद्धि कहाँसे हो सकती है ? नहीं हो सकती है ॥२३॥

तत्पश्चात् राजाने मन्त्रीसे कहा कि हे भद्र ! इसे अगुरु चन्दनका खेत दे दीजिए, जिससे यह बेचारा लकड़ीको बेचकर आजीविका कर सकेगा ॥२४॥

तदनुसार मन्त्रीने उसे कल्पवृक्षोंके समान अभीष्ट वस्तुओंको प्रदान करनेवाले अगुरु वृक्षोंसे व्याप्त खेतको दिखलाया ॥२५॥

उसे देखकर हालिकने इस प्रकार विचार किया कि इस लोभी राजाने सन्तुष्ट होकर अनेक प्रकारके वृक्षोंसे व्याप्त कैसे खेतको दिया है—मुझे अनेक वृक्षोंसे व्याप्त ऐसा खेत नहीं चाहिए था, मैंने तो वृक्ष-वेलियोंसे रहित खेतको माँगा था ॥२६॥

मैंने ऐसे खेतको माँगा था जो सदा जोता जा सकता हो (या मृदु हो), अंजनके समान कृष्ण वर्णवाला हो, विस्तृत हो, चूहों आदिके उपद्रवसे रहित हो तथा छिन्न-भिन्न हो। परन्तु राजाने इसके विपरीत ही खेत दिया है ॥२७॥

---

२२) अ अजल्पदसौ; इ सदाकृष्टं । २४) अ जीवितादेष; क ड इ °मागुरुकं; ब भद्रं । २५) अ° तमदर्शत्ततो ।
२६) अ °महाराज्यैषतुष्टिकः, क ड राजैक° ।

गृह्णामीदमपि क्षेत्रं करिष्यामि स्वयं शुभम् ।
यदीदमपि नो दत्ते राजा किं क्रियते तदा ॥२८

ततः प्रसाद इत्युक्त्वा गेहमागत्य हालिकः ।
कुठारं शातमादाय[1] कुधीः क्षेत्रमशिश्रियत्[2] ॥२९

व्याकृष्टभृङ्गसौरभ्यव्यामोदितदिगन्तराः ।
उन्नताः सरलाः सेव्याः सज्जना इव शर्मदाः ॥३०

दुरापा द्रव्यदाश्छित्त्वा दग्धास्तेनागुरुद्रुमाः ।
निर्विवेका न कुर्वन्ति प्रशस्तं क्वापि सैरिकाः[1] ॥३१

कृषिकर्मोचितं सद्यः शुद्धं हस्ततलोपमम् ।
अकारि हालिकेनेदमन्यायेनेव मन्दिरम् ॥३२

तोषतो[1] दर्शितं तेन[2] राज्ञः क्षेत्रं विशोधितम् ।
अज्ञानेनापि[3] तुष्यन्ति नीचा दर्पपरायणाः ॥३३

२९) १. तीक्ष्णम् । २. आश्रितवान्; क अच्छेदयत् ।
३१) १. मूर्खाः ; क स्वेच्छाचारिणः ।
३३) १. क हर्षतः । २. क हालिकेन । ३. कुकर्मणा ।

अब मैं इसी खेतको लेकर उसे स्वयं उत्तम बनाऊँगा। यदि राजा इसको भी न देता तो मैं क्या कर सकता था ॥२८॥

इस प्रकार विचार करके उसने राजाका आभार मानते हुए उस खेतको ले लिया। तत्पश्चात् वह मूर्ख हालिक घर आया और तीक्ष्ण कुठारको लेकर उस खेतपर जा पहुँचा ॥२९॥

इस प्रकार उसने उक्त खेतमें भौंरोंको आकृष्ट करनेवाली सुगन्धसे दिङ्मण्डलको सुगन्धित करनेवाले, ऊँचे, सीधे, सत्पुरुषोंके समान सेवनीय, सुखप्रद, दुर्लभ व धनको देनेवाले जो अगुरुके वृक्ष थे उनको काटकर जला डाला। ठीक है, विवेक-बुद्धिसे रहित किसान कहींपर भी उत्तम कार्य नहीं कर सकते हैं ॥३०-३१॥

जिस प्रकार न्याय-नीतिसे रहित कोई मनुष्य सुन्दर भवनको कृषिके योग्य बना देता है—उसे धराशायी कर देता है उसी प्रकार उस मूर्ख हलवाहकने उस खेतको निर्मल हथेलीके समान शीघ्र ही खेतीके योग्य बना दिया ॥३२॥

तत्पश्चात् उन अगुरुके वृक्षोंको काटकर विशुद्ध किये गये उस खेतको उसने हर्षपूर्वक राजाको दिखलाया। ठीक है, अभिमानी नीच मनुष्य अज्ञानतासे भी सन्तुष्ट हुआ करते हैं ॥३३॥

२९) अ °मशिश्रयत्; क असिश्रियत् । ३३) ब नीचदर्प° ।

हालिको भणितो राज्ञा किं किमुप्तं त्वयेदृशे ।
तेनोक्तं कोद्रवा देव [illegible] महाफलाः ॥३४
विलोक्य दुर्मातिं तस्य भूभुजा भणितो हली ।
दग्धानामत्र वृक्षाणां किं रे किंचन विद्यते ॥३५
हस्तमात्रं ततस्तेन [illegible] दर्शितम् ।
दग्धशेषतरोरेकं राज्ञा दृष्ट्वा स भाषितः ॥३६
विक्रीणीष्वेदमट्टे[1] त्वं नीत्वा भद्र लघु[2] व्रज ।
तेनोक्तं देव किं मूल्यं काष्ठस्यास्य भविष्यति ॥३७
हसित्वा भूभुजाभाषि हालिको बुद्धिदुर्विधः ।
तदेव भद्र गृह्णीयाद्यत्ते दास्यति वाणिजः ॥३८
हट्टे तेन ततो नीतं काष्ठखण्डं विलोक्य तम् ।
दीनारपञ्चकं मूल्यं तस्य प्रादत्त वाणिजः ॥३९
हालिको ऽसौ ततो दध्यौ[1] विषादानलतापितः ।
अज्ञात्वा कुर्वतः कार्यं तापः कस्य न जायते ॥४०

३७) १. हट्टे । २. क शीघ्रम् ।
४०) १. चिन्तितवान् ।

खेतकी उस दुरवस्थाको देखकर राजाने उस हलवाहकसे पूछा कि तुमने इस प्रकारके खेतमें क्या बोया है। इसपर उसने उत्तर दिया कि हे राजन्। इसको भली-भाँति जोतकर मैंने उसमें महान् फलको देनेवाले कोदों बोये हैं ॥३४॥

तब उसकी दुर्बुद्धिको देखकर राजाने हलवाहकसे कहा कि हे कृषक! यहाँ जलाये गये उन वृक्षोंका क्या कुछ अवशेष है ॥३५॥

इसपर उसने जलनेसे बचे हुए अगुरु वृक्षके एक हाथ प्रमाण टुकड़ेको लाकर राजाको दिखलाया। उसे देखकर राजाने उससे कहा कि हे भद्र! तुम इसे लेकर शीघ्र जाओ और बाजारमें बेच डालो। यह सुनकर कृषकने कहा कि हे देव! इस लकड़ीका क्या मूल्य होगा ॥३६-३७॥

इसके उत्तरमें राजाने हँसकर उस बुद्धिहीनसे कहा कि दूकानदार इसका जो भी मूल्य तुम्हें देगा उसे ले लेना ॥३८॥

तदनुसार वह उस लकड़ीके टुकड़ेको बाजारमें ले गया। उसे देखकर दूकानदारने उसे उसका मूल्य पाँच दीनार दिया ॥३९॥

तत्पश्चात् वह हलवाहक विषादरूप अग्निसे सन्तप्त होकर इस प्रकार विचार करने लगा। ठीक है, जो बिना जाने-पूछे कार्यको करता है उसे सन्ताप होता ही है ॥४०॥

३४) ब किमत्रोप्तम् । ३६) अ शेषं, ब दग्धाशेष° । ३७) क °मद्य for °मट्टे । ३८) अ °दुर्वचाः for दुर्विधः
३९) ब तत् for तम् । ४०) अ तापम् ।

यदीयल्लभ्यते द्रव्यं खण्डेनैकेन विक्रये[1] ।
समस्तानां तदा मूल्यं वृक्षाणां केन गण्यते ॥४१
निधानसदृशं क्षेत्रं वितीर्णं[1] मम भूभुजा ।
अज्ञानिना बत व्यर्थं हारितं पापिना मया ॥४२
अकरिष्यमहं रक्षां द्रुमाणां यदि यत्नतः ।
अभविष्यत्तदा द्रव्यमाजन्मसुखसाधनम् ॥४३
इत्थं स हालिको दूनः[1] पश्चात्तापाग्निना चिरम् ।
दुःसहेनानिवार्येण विरहीव[2] मनोभुवा[3] ॥४४
महारम्भेण यः प्राप्य द्रव्यं नाशयते ऽधमः ।
हलीव लभते तापं दुर्निवारमसौ सदा ॥४५
सारासाराणि यो वेत्ति न वस्तूनि निरस्तधीः ।
निरस्यति करप्राप्तं रत्नमेषो ऽन्यदुर्लभम् ॥४६
स हैमेन हलेनोर्वीमर्कमूलाय कर्षति ।
हेयादेयानि वस्तूनि यो नालोचयते कुधीः ॥४७

४१) १. सति ।
४२) १. क दत्तम् ।
४४) १. तापितः । २. वियोगी । ३. कन्दर्पेण ।

उसने विचार किया कि उन वृक्षोंके एक ही टुकड़ेको बेचनेसे यदि इतना धन प्राप्त होता है तो उन सब ही वृक्षोंके मूल्यको कौन आँक सकता है—उनसे अपरिमित धनराशि प्राप्त की जा सकती थी। राजाने मुझे निधिके समान उस विस्तृत खेतको दिया था। किन्तु खेद है कि मुझ-जैसे अज्ञानी व पापीने उसे यों ही नष्ट कर दिया। यदि मैंने प्रयत्नपूर्वक उन वृक्षोंकी रक्षा की होती तो मुझे उनसे जीवनपर्यन्त सुखको सिद्ध करनेवाला धन प्राप्त होता ॥४१-४३॥

इस प्रकारसे वह हलवाहक दीर्घकाल तक पश्चात्तापरूप अग्निसे सन्तप्त रहा जैसे कि अनिवार्य व दुःसह कामसे विरही मनुष्य सन्तप्त रहा करता है ॥४४॥

जो निकृष्ट मनुष्य बहुत आरम्भके द्वारा धनको प्राप्त करके नष्ट कर देता है वह उस पामरके समान निरन्तर दुर्निवार पश्चात्तापको प्राप्त होता है ॥४५॥

जो नष्टबुद्धि सार व असारभूत वस्तुओंको नहीं जानता है वह दूसरोंको दुर्लभ ऐसे हाथमें प्राप्त हुए रत्नको नष्ट करता है, यह समझना चाहिए ॥४६॥

जो हेय और उपादेय वस्तुओंका विचार नहीं करता है वह मूर्ख मानो सुवर्णमय हलसे आकके मूल (अथवा तूल = रुई) के लिए भूमिको जोतता है ॥४७॥

४१) अ ब इ यदीदं लभ्यते । ४६) क ड इ रत्नमेषा सुदुर्ल° । ४७) क ड °मर्कतूलाय; अ क इ हेयाहेयानि ।

लाङ्गलीवास्ति यद्यत्र सारासाराविवेचकः ।
बिभेमि पृच्छ्यमानो ऽपि तदा वक्तुमहं द्विजाः ॥४८

दुरापागुरुविच्छेदी भाषितो[1] निर्विचारकः ।
युष्माकं चन्दनत्यागी श्रूयतां भाष्यते ऽधुना ॥४९

मध्यदेशे सुखाधारे महनीये कुरूपमे[1] ।
राजा शान्तमना नाम्ना मथुरायामजायत ॥५०

एकदा दुर्निवारेण ग्रीष्मार्केणेव सिन्धुरः[1] ।
पित्तज्वरेण धात्रीशो विह्वलो ऽजनि पीडितः ॥५१

तीव्रेण तेन तापेन [1]तप्तश्चलचलायितः ।
शयने कोमले ऽर्केण स्वल्पे मत्स्य इवाम्भसि ॥५२

तस्योपचर्यमाणो ऽपि भैषज्यैर्वीर्यधारिभिः[1] ।
तापो ऽवर्धत दुश्छेदः काष्ठैरिव विभावसुः[2] ॥५३

---

४९) १. एवंविधा निर्विचारका आवां [वयं] न, त्वं कथय ।
५०) १. भोगभूमिसदृशे ।
५१) १. हस्ती ।
५२) १. सन् ।
५३) १. प्रबलैः । २. अग्निः ।

हे विप्रो ! यदि यहाँ उस हलवाहकके समान सार व असारका विचार न करनेवाला कोई है तो मैं पूछे जानेपर भी कहनेके लिए डरता हूँ ॥४८॥

इस प्रकार मैंने आप लोगोंसे दुर्लभ अगुरु वृक्षोंको काटकर जलानेवाले उस अविवेकी हलवाहककी कथा कही है। अब इस समय चन्दनत्यागीके वृत्तको कहता हूँ, उसे सुनिए ॥४९॥

कुरु (उत्तम भोगभूमि) के समान सुखके आधारभूत व पूजनीय मध्यदेशके भीतर मथुरा नगरीमें एक शान्तमना नामका राजा था ॥५०॥

एक समय जिस प्रकार दुर्निवार ग्रीष्म ऋतु सम्बन्धी सूर्यके तापसे पीड़ित होकर हाथी व्याकुल होता है उसी प्रकार वह राजा पित्तज्वरसे पीड़ित होकर व्याकुल हुआ ॥५१॥

जिस प्रकार अतिशय थोड़े पानीमें स्थित मत्स्य सूर्यके द्वारा सन्तप्त होकर तड़पता है उसी प्रकार वह उस तीव्र ज्वरसे सन्तप्त होकर कोमल शय्याके ऊपर तड़प रहा था ॥५२॥

उसके इस पित्तज्वरकी यद्यपि शक्तिशाली ओषधियोंके द्वारा चिकित्सा की जा रही थी, फिर भी वह दुर्विनाश ज्वर उत्तरोत्तर इस प्रकार बढ़ रहा था जिस प्रकार कि लकड़ियोंके द्वारा अग्नि बढ़ती है ॥५३॥

---

४८) क इ °विचारकः । ४९) अ निर्विचारिणः ब निर्विचारणः । ५०) इ गुरूपमे । ५२) अ ब °चलायते; अ ब कोमलार्केण; ब क सो ऽल्पे for स्वल्पे । ५३) भेषजै° ।

चिकित्सामष्टधा[1] वैद्या विदन्तो ऽप्यभवन् क्षमाः ।
तापस्य साधने नास्य दुर्जनस्येव सज्जनाः ॥५४
तं वर्धमानमालोक्य दाहं देहे महीपतेः ।
मन्त्रिणा घोषणाकारि मथुरायामशेषतः[1] ॥५५
दाहं नाशयते राज्ञो यः कश्चन शरीरतः ।
ग्रामाणां दीयते तस्य शतमेकं सगौरवम् ॥५६
कण्ठाभरणमुत्कृष्टं मेखला खलु दुर्लभा ।
दीयते वस्त्रयुग्मं च राज्ञा परिहितं निजम् ॥५७
दार्वर्थं[1] चन्दनस्यैको वाणिजो निर्गतो बहिः ।
ददर्श दैवयोगेन रजकस्य करस्थितम् ॥५८
गोशीर्षचन्दनस्येदं तेन ज्ञात्वालिसंगतम् ।
भणितो ऽसौ त्वया भद्र क्व लब्धं निम्बकाष्ठकम् ॥५९
तेनावादि मया प्राप्तं वहमानं नदीजले ।
वणिजोक्तमिदं देहि गृहीत्वा काष्ठसंचयम् ॥६०

---

५४) १. रोगिस्वरूपं विदन्तः ।

५५) १. समन्ततः सर्वतः ।

५८) १. क काष्ठार्थम् ।

आठ प्रकारकी चिकित्साके जाननेवाले वैद्य भी उसके उस ज्वरके सिद्ध करनेमें—उसके दूर करनेमें—इस प्रकार समर्थ नहीं हुए जिस प्रकार कि सज्जन मनुष्य दुर्जनके सिद्ध करनेमें—उसे वश करनेमें—समर्थ नहीं होते हैं ॥५४॥

राजाके शरीरमें बढ़ते हुए उस दाहको देखकर मन्त्रीने मधुरा (मथुरा) में सब ओर यह घोषणा करा दी कि जो कोई राजाके शरीरसे उस दाहको नष्ट कर देगा उसे धन्यवाद-पूर्वक सौ ग्राम दिये जायेंगे। इसके साथ ही उसे उत्तम हार, दुर्लभ कटिसूत्र और राजाके द्वारा पहने हुए दो वस्त्र भी दिये जायेंगे ॥५५-५७॥

तब एक वैश्य चन्दनकी लकड़ी लेनेके लिए नगरके बाहर गया। भाग्यवश उसे एक चन्दनकी लकड़ी वहाँ धोबीके हाथमें दिखाई दी ॥५८॥

उसने भौंरोंसे व्याप्त उस लकड़ीको गोशीर्ष चन्दनकी जानकर धोबीसे पूछा कि हे भद्र ! तूने यह नीमकी लकड़ी कहाँसे प्राप्त की है ॥५९॥

इसके उत्तरमें धोबीने कहा कि यह मुझे नदीके जलमें बहती हुई प्राप्त हुई है। इसपर वैश्यने कहा कि तू इसके बदलेमें दूसरी लकड़ियोंके समूहको लेकर उसे मुझे दे दे ॥६०॥

---

५४) ब विदन्तो नाभवन् । ५५) इ तापं देहे । ५७) ब मेखलाः खलदुर्लभाः । ५८) इ °स्यैको वणिजो । ५९) अ °लिगं ततः, ब क ड °संगतः । ६०) ड वाणिजोक्त° ।

साधो गृहाण को दोषस्ते[1] नोक्त्वेति विचेतसा ।
आदाय दारुसंदोहं वितीर्णं वाणिजाय तत् ॥६१

वणिजागत्य वेगेन घर्षित्वा बुद्धिशालिना ।
विलिप्तो भूपतेर्देहश्चन्दनेनामुनाभितः ॥६२

तस्य स्पर्शेन निःशेषस्तापो राज्ञः पलायितः ।
इष्टस्येव कलत्रस्य दुरुच्छेदो वियोगिनः ॥६३

पूजितो वाणिजो राज्ञा दत्त्वा भाषितमञ्जसा ।
उपकारो गरिष्ठानां कल्पवृक्षायते कृतः ॥६४

काष्ठप्रसादतः पूजां वाणिजस्य निशम्य ताम् ।
स[1] शिरस्ताडमाक्रन्दीद्रजकः शोकतापितः ॥६५

आगत्य ज्ञायमानेन विमोह्य वणिजा ततः ।
हा कथं वञ्चितो ऽनेन यमेनेव दुरात्मना ॥६६

निम्बमुक्त्वा गृहीतं मे[1] गोशीर्षं चन्दनं कथम् ।
यमो ऽपि वञ्च्यते नूनं वाणिजैः सत्यमोचिभिः ॥६७

---

६१) १. रजकेन ।
६५) १. रजकः ।
६७) १. मम ।

यह सुनकर 'हे सज्जन ! तुम इसे ले लो, इसमें क्या हानि है' यह कहते हुए उस विवेकशून्य धोबीने बदलेमें अन्य लकड़ियोंके समुदायको लेकर वह लकड़ी वैश्यको दे दी ॥६१॥

तत्पश्चात् उस बुद्धिमान् वैश्यने शीघ्र आकर उस लकड़ीको घिसा और उस चन्दनसे राजाके शरीरको सब ओरसे लिप्त कर दिया ॥६२॥

उसके स्पर्शसे राजाका वह समस्त ज्वर इस प्रकार नष्ट हो गया जिस प्रकार कि अभीष्ट कान्ताके स्पर्शसे वियोगी जनोंका दुर्विनाश कामज्वर नष्ट हो जाता है ॥६३॥

तब राजाने घोषणाके अनुसार वैश्यको ग्रामादिको देकर वस्तुतः उसकी पूजा की। ठीक ही है, श्रेष्ठ पुरुषोंके द्वारा किया गया उपक्रम कल्पवृक्षके समान फलप्रद हुआ करता है ॥६४॥

इस प्रकार उस लकड़ीके प्रभावसे वैश्यकी उक्त पूजाको सुनकर धोबी शोकसे अतिशय सन्तप्त हुआ, तब वह अपना सिर पीटकर विलाप करने लगा ॥६५॥

वह आकर बोला कि यही वह परिचित वैश्य है। खेद है कि इसने मुझे मूर्ख बनाकर दुरात्मा यमके समान कैसे ठग लिया, इसने नीम कहकर मेरे गोशीर्ष चन्दनको कैसे ले लिया। निश्चयसे ये असत्यभाषी वैश्य यमराजको भी ठग सकते हैं ॥६६-६७॥

---

६१) ब तेनोक्तेन; अ आहार्य दारु°; ब इ वणिजाय; अ यत्, ड तम् । ६४) अ ब वरिष्ठानां । ६६) अ विमुह्य, इ विनोद्य; क ड बत for ततः ।

इत्थं शोकेन घोरेण रजको दह्यते ऽनिशम् ।
अज्ञाने वर्तमानानां जायते न सुखासिका[1] ॥६८

एकस्य निम्बकाष्ठस्य काष्ठानां निवहं कथम् ।
ददाति वाणिजो नेदं परिवर्तो[1] व्यबुध्यत ॥६९

दुश्छेद्यं सूर्यरश्मीनामगम्यं चन्द्ररोचिषाम् ।
दुर्वारमिदमज्ञानं तमसो ऽपि परं[1] तमः ॥७०

चित्तेन वीक्षते तत्त्वं ध्वान्तमूढो न चक्षुषा ।
अज्ञानमोहितस्वान्तो न चित्तेन न चक्षुषा ॥७१

परिवर्तसमो[1] विप्रा विद्यते यदि कश्चन ।
बिभेम्यहं तदा तत्त्वं पृच्छ्यमानो ऽपि भाषितुम् ॥७२

६८) १. सुखस्थितिः ।
६९) १. क रजकः ।
७०) १. उत्कृष्टम् ।
७२) १. क रजकसदृशो ।

इस प्रकार वह धोबी महान् शोकसे रात-दिन सन्तप्त रहा। ठीक है, अज्ञानमें वर्तमान—बिना विचारे कार्य करनेवाले—मनुष्योंके सुखकी स्थिति कैसे हो सकती है ? नहीं हो सकती है ॥६८॥

वह वैश्य एक नीमकी लकड़ीके लिए लकड़ियोंके समूहको कैसे देता है, इस परिवर्तनको धोबी नहीं जान सका ॥६९॥

यह अज्ञानरूप अन्धकार न तो सूर्यकी किरणों द्वारा भेदा जा सकता है और न चन्द्रकी किरणों द्वारा भी नष्ट किया जा सकता है। इसीलिए इस दुर्निवार अज्ञानको उस लोकप्रसिद्ध अन्धकारसे भी उत्कृष्ट अन्धकार समझना चाहिए ॥७०॥

इसका कारण यह है कि अन्धकारसे विमूढ़ मनुष्य यद्यपि आँखसे वस्तुस्वरूपको नहीं देखता है, फिर भी वह अन्तःकरणसे तो वस्तुस्वरूपको देखता ही है। परन्तु जिसका मन अज्ञानतासे मुग्ध है वह उस वस्तुस्वरूपको न अन्तःकरणसे देखता है और न आँखसे भी देखता है ॥७१॥

अतएव हे विप्रो ! बहुत-सी लकड़ियोंसे उस चन्दनकी लकड़ीका परिवर्तन करनेवाले उस धोबीके समान यदि कोई ब्राह्मण आपके मध्यमें विद्यमान है तो मैं पूछे जानेपर भी कुछ कहनेके लिए डरता हूँ ॥७२॥

६८) ब ऽदह्यतानिशम् ; इ सुखाशिका । ६९) क विबुध्यते । ७०) अ °रश्मीनां न गम्यं । ७२) अ विप्रो ।

इत्थं सुचन्दनत्यागी भाषितो ज्ञानदुर्विधः।
सर्वनिन्दास्पदं मूर्खः सांप्रतं प्रतिपाद्यते[1] ॥७३

चत्वारो ऽथ महामूर्खा गच्छन्तः क्वापि लीलया।
मुमुक्षुमेकमद्राक्षुर्जिनेश्वरमिवानघम् ॥७४

वीरनाथो ऽप्यनिस्त्रिंशः[1] सूनृतो द्वयवाद्यपि[2]।
चित्तहार्यो ऽपि निःस्तेयो निष्कामो[3] ऽपि महाबलः ॥७५

धृतग्रन्थो[1] ऽपि निर्ग्रन्थः समलाङ्गो ऽपि निर्मलः।
गुप्तिमानपि निर्बन्धो विरूपो ऽपि जनप्रियः ॥७६

महाव्रतनिविष्टो ऽपि यो ऽन्धकारातिमर्दकः।
समस्तद्वन्द्वमुक्तो ऽपि समितीनां प्रवर्तकः ॥७७

७३) १. क कथ्यते।
७५) १. न निर्दयः दयावान्; क शस्त्ररहितः। २. क व्यवहारनिश्चयवादी। ३. न वाञ्छा।
७६) १. धृतशास्त्र।

इस प्रकार मैंने विवेकज्ञानसे शून्य होकर चन्दनका परित्याग करनेवाले उस धोबीकी कथा कही है। अब इस समय अज्ञानादि सब ही दोषोंके आश्रयभूत मूर्खकी कथा कही जाती है ॥७३॥

कहीं पर चार महामूर्ख क्रीड़ासे जा रहे थे। उन्होंने मार्गमें जिनेश्वरके समान निर्दोष किसी एक मोक्षार्थी साधुको देखा ॥७४॥

वह साधु शूर-वीरोंका स्वामी होकर भी निर्दय नहीं था, यह विरोध है (कारण कि शूर-वीर कभी शत्रुके ऊपर दया नहीं किया करते हैं)। उसका परिहार—वह कर्मविजेता होकर भी प्राणिरक्षामें तत्पर था। वह द्वैतवादी होकर भी सच्चा था, यह विरोध है। परिहार—वह अस्ति-नास्ति, एक-अनेक, नित्य-अनित्य और भेद-अभेद आदि परस्पर विरुद्ध दो धर्मोंका नयोंके आश्रयसे कथन करता हुआ भी यथार्थवक्ता था। वह दूसरोंके चित्तका अपहरण करता हुआ भी चौर कर्मसे रहित था—वह व्रत-संयमादिके द्वारा भव्यजनोंके चित्तको आकर्षित करता हुआ चौर्य कर्म आदि पापोंका सर्वथा त्यागी था, कामदेवसे रहित होकर भी अतिशय बलवान् था—सब प्रकारकी विषयवासनासे रहित होकर आत्मिक बलसे परिपूर्ण था, ग्रन्थ (परिग्रह) को धारण करता हुआ भी उस परिग्रहसे रहित था—अनेक ग्रन्थोंका ज्ञाता होता हुआ भी दिगम्बर था, मलपूर्ण शरीरको धारण करता हुआ भी मलसे रहित था—स्नानका परित्याग कर देनेसे मलिन शरीरको धारण करता हुआ भी सब प्रकारके दोषोंसे रहित था, गुप्ति (कारागार या बन्धन) से संयुक्त होता हुआ भी बन्धनसे रहित (स्वतन्त्र) था—मनोगुप्ति आदि तीन गुप्तियोंका धारक होकर भी क्लिष्ट कर्मबन्धसे रहित था, कुरूप होकर भी जनोंको प्रिय था—विविध स्वरूपका धारक होकर भी तप-संयमादिके कारण जनोंके अनुरागका विषय था, महाव्रत (प्राणिरक्षाव्रत) में स्थित होकर भी अन्धे

७३) ब मयेत्थं चन्दन°....सर्वविद्यास्पदं मूर्खं; ब क इ संप्रति। ७४) ब क ड इ अपि for अथ; अ गच्छन्ति। ७५) ब °पि निस्त्रिंशः....हार्यपि; अ निस्तेजो, क निस्नेहो। ७६) अ निर्बद्धो। ७७) क इ °कारादिमर्दकः।

रक्षको ऽप्यङ्गिवर्गस्य धर्ममार्गणकोविदः।
सत्यारोपितचित्तो ऽपि वृषवृद्धिविधायकः ॥७८

अम्भोधिरिव गम्भीरः सुवर्णाद्रिरिव स्थिरः।
विवस्वानिव[1] तेजस्वी कान्तिमानिव चन्द्रमाः ॥७९

इभारातिरिवाभीतः कल्पशाखीव कामदः।
चरण्युरिव[2] निःसंगो देवमार्ग इवामलः ॥८०

निःपीडिताशेषशरीरराशिभिः क्षणेन पापैः क्षतदृष्टिवृत्तिभिः[2]।
निषेवमाणा जनता विमुच्यते विभास्वरं यं [3]शिशिरैरिवानलम् ॥८१

पुरन्दरब्रह्ममुरारिशंकरा विनिर्जिता येन[1] निहत्य मार्गणैः।
प्रपेदिरे दुःखशतानि सर्वदा जघान तं यो[2] मदनं सुदुर्जयम् ॥८२

७९) १. सूर्यः

८०) १. क सिंह इव। २. वायुः।

८१) १. नष्ट। २. सम्यग्व्रतरहितैः। ३. शीतैरिव = जनैर्निषेव्यमाणः।

८२) १. कामेन। २. यः मुनिः।

शत्रुओंका संहारक था—अहिंसादि महाव्रतोंका परिपालक होकर भी अज्ञानरूप अन्धकारका निर्मूल विनाश करनेवाला था, समस्त झगड़ोंसे रहित होता हुआ भी युद्धोंका प्रवर्तक था—सब प्रकारके विकल्पोंसे रहित होता हुआ भी ईर्या-भाषादि पाँच समितियोंका परिपालन करनेवाला था, प्राणिसमूहका रक्षक होकर भी धनुषसे बाणोंके छोड़नेमें कुशल था—प्राणिसमूहके विषयमें दयालु होकर भी धर्मके खोजनेमें चतुर था, तथा सत्यमें आरोपित-चित्त होकर (चित्तको स्थित न करके) भी धर्मवृद्धिका करनेवाला था—सत्यभाषणमें आरोपितचित्त होकर (चित्तको दृढ़तासे अवस्थित करके) धर्मकी वृद्धि करनेवाला था ॥७५-७८॥

उक्त साधु समुद्रके समान गम्भीर, सुमेरुके समान अटल, सूर्यके समान तेजस्वी, चन्द्रमाके समान कान्तिमान् , सिंहके समान निर्भय, कल्पवृक्षके समान अभीष्टको देनेवाला, वायुके समान निष्परिग्रह, और आकाशके समान निर्मल था। ७९-८०॥

जिस प्रकार देदीप्यमान अग्निका सेवन करनेवाले प्राणी शीतकी बाधासे मुक्त हो जाते हैं उसी प्रकार उस-जैसे तेजस्वी साधुकी आराधना करनेवाले भव्य जन सम्यग्दर्शन व संयमको नष्ट करके समस्त प्राणिसमूहको पीड़ित करनेवाले पापोंसे क्षणभरमें मुक्त हो जाते हैं ॥८१॥

जिस कामदेवके द्वारा बाणोंसे आहत करके वशमें किये गये इन्द्र, ब्रह्मा, विष्णु और महादेव निरन्तर सैकड़ों दुःखोंको प्राप्त हुए हैं उस अतिशय प्रबल कामदेवको उस मुनिने नष्ट कर दिया था ॥८२॥

७८) अ °प्यङ्गवर्गस्य....विषवृद्धि°। ८०) ब वेदमार्ग। ८१) अ °शरीरि°....क्षितदृष्टि°; इ निषेव्यमाणं।

स्मरं जितस्वर्गिगणं जिगाय यः[1] कथं न सो ऽस्मान् तरसा[2] विजेष्यते ।
इतीव भीता बलिनः क्रुधादयः[3] सिषेविरे[4] यं[5] न महापराक्रमम् ॥८३
तपांसि भेजे[1] न तमांसि यः सदा कथा बभाषे विकथा न निन्दिताः ।
जघान दोषान्न गुणाननेकशो मुमोच निद्रां न जिनेन्द्रभारतीम् ॥८४
चकार यो विश्वजनीनशासनः[1] समस्तलोकप्रतिबोधमञ्जसा ।
विबुद्धनिःशेषचराचरस्थितिर्जिनेन्द्रवद्देवनरेन्द्रवन्दितः ॥८५
निवारिताक्षप्रसरो ऽपि तत्त्वतः पदार्थजातं[1] निखिलं विलोकते ॥
प्रपालितस्थावरजङ्गमो ऽपि यश्चकार बाढं विषयप्रमर्दनम् ॥८६
गुणावनद्धौ[1] पदपङ्कजप्लवौ[2]अपारसंसारपयोधितारकौ ।
ववन्दिरे तस्य मुनीश्वरस्य ते[3] वसुंधरापृष्ठनिविष्टमस्तकाः ॥८७

८३) १. यः मुनिः । २. ज्ञात्वा (?) । ३. दोषाः । ४. नाश्रितवन्तः । ५. मुनिम् ।
८४) १. सेवे न ।
८५) १. विश्वजनेभ्यो हितं विश्वजनीनम् । विश्वजनीनं शासनम् आज्ञा यस्यासौ ।
८६) १. वस्तुसमूहम् ।
८७) १. गुणैर्निबन्धो[द्धौ] ; क युक्तौ । २. यानपात्रम् ; क चरणकमलप्रवहणौ । ३. क ते चत्वारो मूर्खाः ।

जिस मुनिने देवसमूहको जीतनेवाले कामदेवको जीत लिया है वह हम सबको शीघ्र ही जीत लेगा, ऐसा विचार करके ही मानो बलवान् क्रोधादि शत्रुओंने अतिशय भयभीत होकर उस महापराक्रमी मुनिकी सेवा नहीं की। तात्पर्य यह कि उक्त मुनिने कामके साथ ही क्रोधादि कषायोंको भी जीत लिया था ॥८३॥

वह मुनि तपोंका आराधन करता था, परन्तु अज्ञान अन्धकारका आराधना कभी नहीं करता था; वह धर्मकथाओंका वर्णन तो करता था, किन्तु स्त्रीकथा आदिरूप अप्रशस्त विकथाओंका वर्णन नहीं करता था; वह अनेकों दोषोंको तो नष्ट करता था, किन्तु गुणोंको नष्ट नहीं करता था, तथा उसने निद्राको तो छोड़ दिया था, किन्तु जिनवाणीको नहीं छोड़ा था ॥८४॥

जिनेन्द्रके समान इन्द्रों व चक्रवर्तीसे वन्दित उस मुनिने समस्त चराचर लोककी स्थितिको जानकर सब ही प्राणियोंको प्रतिबोधित कर विश्वका हित करनेवाले आगम (उपदेश) को किया था ॥८५॥

वह मुनीन्द्र इन्द्रियोंके व्यापारको रोक करके भी समस्त पदार्थसमूहको प्रत्यक्ष देखता था—अतीन्द्रिय प्रत्यक्षके द्वारा समस्त पदार्थोंको स्पष्टतासे जानता था, तथा स्थावर व त्रस प्राणियोंका संरक्षण करके भी विषय-भोगोंका अतिशय खण्डन करता था—इन्द्रिय विषयोंको वह सर्वथा नष्ट कर चुका था ॥८६॥

उपर्युक्त चारों मूर्खोंने उस मुनीन्द्रके उन दोनों चरण-कमलरूप नौका की पृथिवी पृष्ठपर मस्तक रखकर वन्दना की जो कि गुणोंसे सम्बद्ध होकर प्राणियोंको संसाररूप समुद्रसे पार उतारनेवाले थे ॥८७॥

८३) ब जिगेष्यते for विजेष्यते; अ अतीव भीता । ८४) ब कदा for सदा; अ गुणाननेनसः ।

प्ररूढपापाद्रिविभेदनाशिनीं स धर्मवृद्धिं विततार[1] संयतः[2] ।
सकृच्चतुर्णामपि[3] दुःखहारिणीं सुखाय तेषामनवद्यचेष्टितः[4] ॥८८

उपेत्य[1] ते योजनमेकमर्गलं[2] विसंवदन्ति स्म परस्परं जडाः ।
मनीषिताशेषफलप्रदायिनी कुतो हि संवित्तिरपास्तचेतसाम्[4] ॥८९

अवोचदेको मम मे परः परो ममाशिषं साधुरदत्त मे ऽपरः ।
प्रजल्पतामित्थमभूदनिर्गलश्चिराय[1] तेषां हतचेतसां कलिः[2] ॥९०

अजल्पदेकः[1] किमपार्थकं[2] जडा विधीयते[3] राटिरसौ मुनीश्वरः ।
प्रपृच्छ्यतामेत्य[4] विनिश्चयप्रदस्तमांसि तिष्ठन्ति न भास्करे सति ॥९१

इदं वचस्तस्य निशम्य ते ऽखिला मुनीन्द्रमासाद्य बभाषिरे जडाः ।
अदास्तदा यां मुनिपुंगवाशिषं प्रसादतः सा वद कस्य जायताम् ॥९२

---

८८) १. क दत्तवान् । २. क मुनिः । ३. एकवारम् । ४. आचरणम् ।

८९) १. क गत्वा । २. अधिकम् ; क झकटकं चक्रुः । ३. क सम्यग्ज्ञान ; प्रज्ञा । ४. क मूर्खाणाम् ।

९०) १. चिरकालम् । २. क क्लेशः ।

९१) १. पथिकः । २. वृथा । ३. कलिः । ४. गत्वा ।

तत्र वृद्धिंगत पापरूप पर्वतको खण्डित करनेके लिए वज्रके समान होकर निर्दोष आचरण करनेवाले उस मुनीन्द्रने एक साथ उन चारोंके दुखको नष्ट करके सुख देनेवाली धर्मवृद्धि (आशीर्वादस्वरूप) दी ॥८८॥

पश्चात् वे चारों मूर्ख उक्त मुनिराजके पाससे एक योजन अधिक जाकर उस आशीर्वादस्वरूप धर्मवृद्धिके विषयमें परस्पर विवाद करने लगे। ठीक है, विवेक बुद्धिसे रहित प्राणियोंके भला इच्छित समस्त फलोंको प्रदान करनेवाला समीचीन ज्ञान कहाँसे हो सकता है ? नहीं हो सकता है ॥८९॥

उनमें-से एक बोला कि साधुने आशीर्वाद मुझे दिया है, दूसरा बोला कि मुझे दिया है, तीसरा बोला कि नहीं मुझे साधुने आशीर्वाद दिया है, तथा चौथा बोला कि उसने मुझे आशीर्वाद दिया है। इस प्रकारसे विवाद करते हुए उन चारों मूर्खोंके मध्यमें बहुत समय तक निरंकुश झगड़ा चलता रहा ॥९०॥

अन्तमें किसी एकने कहा कि अरे मूर्खो ! व्यर्थ क्यों झगड़ा करते हो, उसके विषयमें निश्चय करा देनेवाले उसी मुनिसे जाकर पूछ लो। कारण यह कि सूर्यके होनेपर कभी अन्धकार नहीं रहता है ॥९१॥

उसके इस वचनको सुनकर वे सब मूर्ख मुनीन्द्रके पास जाकर बोले कि हे मुनिश्रेष्ठ ! जिस आशीर्वादको तुमने दिया है, कृपा करके यह कहिए कि वह किसके लिये है ॥९२॥

---

८८) ब ड सद्धर्म । ८९) इ मनीषिणाशेष; क इ संवृत्ति° । ९०) अ ब परस्परो; अ इ °दनिर्गलं ; अ हितचेतसां किल । ९१) क ड इ पपृच्छता° ।

ततो ऽमुनावाचि[1] भवत्सु यो जडो विनिन्दितो मूर्खतमो ऽस्ति तस्य सा[2] ।
ततः स्म सर्वे ऽहमहं वदन्त्यमी पराभवः[3] क्वापि न सह्यते जनैः ॥९३

निशम्य तेषां[1] कदनं[2] दुरुत्तरं[3] जगाद साधुः समुपेत्य[4] पत्तनम् ।
विवेचयध्वं[5] बुधलोकवाक्यतो जडा जडत्वं कलिमत्र कार्षु मा[6] ॥९४

श्रुत्वा साधोरमितगतयो वाचमेनां जडास्ते
जग्मुः सर्वे झटिति[1] नगरं राटिमत्यस्य[2] तुष्टाः ।
तिर्यञ्चो ऽप्यामुदितहृदयाः कुर्वते साधुवाक्यं
संज्ञावन्तो भुवनमहितं मानवाः किं न कुर्युः ॥९५

इति धर्मपरीक्षायाममितगतिकृतायामष्टमः परिच्छेदः ॥८॥

९३) १. मुनिना । २. धर्मवृद्धिः । ३. तिरस्कारः ।

जो सब कर्मोंका नाश करके इन्द्र, धरणेन्द्र और चक्रवर्ती इन तीन लोकके स्वामियोंके द्वारा स्तुत होता हुआ समस्त लोककी व्यवस्थाको ज्ञात कर चुका है उसे देव स्वीकार करना चाहिए। जो प्राणिरक्षणकी प्रधानतासे संयुक्त होता हुआ रागादिक दोषोंके दूर करनेमें समर्थ है वह धर्म कहा जाता है। जो हेय और उपादेय तत्त्वके प्रकट करनेमें दक्ष है वह शास्त्र अभीष्ट माना गया है। तथा जिसका शरीर वैराग्यसे विभूषित है और जो परिग्रहके दुष्ट संसर्गसे रहित होता हुआ अपरिमित ज्ञानस्वरूप है उसे गुरु जानना चाहिए ॥१०२॥

इस प्रकार आचार्य अमितगतिविरचित धर्मपरीक्षामें
तेरहवाँ परिच्छेद समाप्त हुआ ॥१३॥

९९) अ शुद्धि। १००) ब निकृत्य। १०२) अ प्रकटनप्रवणम्; अ °संगोपसंगः, क ड इ °संगोप्यभङ्गः।

तवान्यदपि मित्राहं निगदामि कुतूहलम् ।
विनिगद्येत्युषे रूपं मुमोच खचराङ्गजः ।।१

ततः पुष्पपुरं भूयो विवेशोत्तरया दिशा ।
सार्धं पवनवेगेन गृहीत्वा तापसाकृतिम् ।।२

स घण्टां भेरिमाताड्य निविष्टो हेमविष्टरे ।
आगत्य माहनाः[१] प्राहुरागतस्तापसः कुतः ।।३

किं त्वं व्याकरणं वेत्सि किं वा तर्कं सविस्तरम् ।
करोषि ब्राह्मणैः सार्धं किं वादं शास्त्रपारगैः ।।४

तेनोक्तमहमायातो भूदेवा ग्रामतो ऽमुतः ।
वेद्मि व्याकरणं तर्कं वादं वापि न किंचन ।।५

विप्राः प्राहुर्वद क्रीडां विमुच्य त्वं यथोचितम्[१] ।
स्वरूपपृच्छिभिः सार्धं क्रीडां कर्तुं न युज्यते ।।६

३) १. विप्राः ।
६) १. यथायोग्यम् ।

तत्पश्चात् मनोवेग पवनवेगसे बोला कि हे मित्र ! मैं अब तुझे और भी कुतूहल कहता हूँ—आश्चर्यजनक वृत्तको दिखलाता हूँ, यह कहते हुए उस विद्याधरके पुत्रने पूर्वमें जिस मुनिके वेषको धारण किया था उसे छोड़ दिया ।।१।।

बादमें वह पवनवेगके साथ तापसके वेषको ग्रहण करके फिरसे भी उसी पाटलीपुत्र नगरके भीतर उत्तर दिशाकी ओरसे प्रविष्ट हुआ ।।२।।

उसके भीतर जाकर वह घण्टा और भेरीको बजाता हुआ सुवर्णमय सिंहासनके ऊपर जा बैठा । तब घण्टा और भेरीके शब्दको सुनकर ब्राह्मण वहाँ आ पहुँचे । उन्होंने उससे पूछा कि हे तापस, तुम कहाँसे आये हो, तुम क्या व्याकरणको जानते हो या विस्तारपूर्ण न्यायको जानते हो, तथा तुम क्या शास्त्रके मर्मज्ञ हम ब्राह्मणोंके साथ वाद करना चाहते हो ।।३-४।।

इसपर तापस वेषधारी मनोवेग बोला कि हे ब्राह्मणो ! मैं अमुक गाँवसे आया हूँ, तथा मैं व्याकरण, न्याय और वाद इनमें किसीको भी नहीं जानता हूँ ।।५।।

उसके इस उत्तरको सुनकर ब्राह्मण बोले कि तुम परिहासको छोड़कर यथायोग्य अपने

१) अ इ विनिगद्य ऋषे; क ड खेचरा° । ३) अ क ड इ घण्टाभेरिं° । ६) ब क इ स्वरूपं पृ° ।

खेचरेण ततो ऽवाचि तापसाकारधारिणा ।
कथयामि यथावृत्तं युष्मभ्यो ऽहं परं बके[1] ॥७
युक्ते ऽपि भाषिते विप्राः कुर्वते निर्विचारकाः ।
आरोप्यायुक्ततां दुष्टा रभसोपद्रवं परम् ॥८
सूत्रकण्ठास्ततो ऽवोचन् वद भद्र यथोचितम् ।
सर्वे विचारका विप्रा युक्तपक्षानुरागिणः ॥९
तदीयं वचनं श्रुत्वा जगाद खगनन्दनः[1] ।
निगदामि तदाभीष्टं यदि यूयं विचारकाः ॥१०
बृहत्कुमारिका माता साकेते नगरे[1] मम ।
दत्ता स्वकीयतातेन[2] मदीयजनकाय सा ॥११
श्रुत्वा तूर्यरवं हस्ती कृतान्त इव दारुणः[1] ।
मत्तो भङ्क्त्वागतः स्तम्भं विवाहसमये तयोः ॥१२
ततः पलायितो लोकः समस्तो ऽपि दिशोदिशः ।
विवाहकारणं हित्वा स्थिरत्वं क महाभये ॥१३

७) १. बिभेमि ।
१०) १. क मनोवेगः ।
११) १. अयोध्यायाम् । २. मम सावित्रीपित्रा ।
१२) १. क भयानकः ।

वृत्तको बतलाओ। कारण कि जो यथार्थ स्वरूपको पूछते हैं उनके साथ परिहास करना उचित नहीं माना जाता है ॥६॥

यह सुनकर तापसकी आकृतिको धारण करनेवाला वह मनोवेग विद्याधर बोला कि मैं अपनी कथाको कह तो सकता हूँ, परन्तु उसे कहते हुए मैं आप लोगोंसे डरता हूँ ॥७॥

हे विप्रो! इसका कारण यह है कि योग्य भाषण करनेपर भी अविवेकी दुष्ट जन उसके विषयमें अयोग्यपनेका आरोप लगाकर शीघ्र ही उपद्रव कर बैठते हैं ॥८॥

इसपर ब्राह्मण बोले कि हे भद्र पुरुष! तुम निर्भय होकर अपने यथायोग्य वृत्तान्तको कहो, हम सब ब्राह्मण विचारशील होते हुए योग्य पक्षमें अनुराग करनेवाले हैं ॥९॥

ब्राह्मणोंके इस कथनको सुनकर वह विद्याधरकुमार बोला कि यदि आप सब विचारशील हैं तो फिर मैं अपने अभीष्ट वृत्तान्तको कहता हूँ ॥१०॥

अयोध्या नगरीमें मेरी बृहत्कुमारिका माता है। वह अपने पिता—मेरे नाना—के द्वारा मेरे पिताको दी गयी थी ॥११॥

उन दोनोंके विवाहके अवसरपर जो बाजोंका शब्द हुआ था उसे सुनकर यमराजके समान भयानक एक उन्मत्त हाथी स्तम्भको उखाड़कर वहाँ आ पहुँचा ॥१२॥

उसको देखकर अभ्यागत सब ही जन विवाहके प्रयोजनको छोड़कर दसों दिशाओंमें

७) अ कथावृत्तम्; ब युष्मत्तो ऽहम् । ८) क इ कुर्वन्ति; क ड इ °युक्तिताम् । १२) ब गजस्तम्भम् । १३) अ दिग्गोदिशं, इ दिशो दश; अ क विवाहकरणम् ।

वधूः पलायमानेन वरेण व्याकुलात्मना ।
स्वाङ्गस्पर्शेन निश्चेष्टा पातिता वसुधातले ॥१४
पातयित्वा वधूं नष्टो भर्ता पश्यत पश्यत ।
लोकैरित्युदिते क्वापि लज्जमानो वरो गतः ॥१५
सार्धे मासे ततो भूत्वा गर्भः स्पष्टत्वमागतः ।
उदरेण समं तस्या नवमासानवर्धत ॥१६
मात्रा पृष्टा ततः पुत्रि केनेदमुदरं कृतम् ।
साचचक्षे न जानामि वराङ्गस्पर्शतः परम् ॥१७
आगतास्तापसा गेहं भोजयित्वा विधानतः ।
मातामहेन ते पृष्टाः क्व यूयं यातुमुद्यताः ॥१८
एतैर्निवेदितं तस्य भो दुर्भिक्षं भविष्यति ।
अत्र द्वादश वर्षाणि सुभिक्षे प्रस्थिता वयम् ॥१९

१५) १. अहो लोकाः ।
१६) १. कन्यायाः ।
१७) १. उवाच ।
१९) १. क तापसैः । २. कथितम् । ३. निर्गताः ।

भाग गये । सो यह ठीक भी है, क्योंकि, महान् भयके उपस्थित होनेपर भला स्थिरता कहाँसे रह सकती है ? नहीं रह सकती है ॥१३॥

उस समय भयसे व्याकुल होकर वर भी भाग खड़ा हुआ । तब उसके शरीरके स्पर्शसे निश्चेष्ट होकर वधू पृथिवीतलपर गिर पड़ी ॥१४॥

उस समय देखो-देखो ! पति पत्नीको गिराकर भाग गया है, इस प्रकार जनोंके कहनेपर वर लज्जित होता हुआ कहीं चला गया ॥१५॥

इससे उसके जो गर्भ रह गया था वह अढ़ाई महीनेमें स्पष्ट दिखने लगा । तत्पश्चात् उसका वह गर्भ उदरवृद्धिके साथ नौ मास तक उत्तरोत्तर बढ़ता ही गया ॥१६॥

उसकी गर्भावस्थाको देखकर माताने उससे पूछा कि हे पुत्री ! तेरा यह गर्भ किसके द्वारा किया गया है । इसपर उसने उत्तर दिया कि विवाहके समय हाथीका उपद्रव होनेपर पतिका केवल शरीरस्पर्श हुआ था, इतना मात्र मैं जानती हूँ; इसके अतिरिक्त अन्य कुछ भी नहीं जानती हूँ ॥१७॥

एक समय मेरे नानाके घरपर जो तपस्वी आये थे उन्हें विधिपूर्वक भोजन कराकर उसने उनसे पूछा कि आप लोग कहाँ जानेके लिए उद्यत हो रहे हैं ॥१८॥

इसपर वे मेरे नानासे बोले कि हे भद्र ! यहाँ बारह वर्ष तक दुर्भिक्ष पड़नेवाला है, इसलिए जहाँ सुभिक्ष रहेगा वहाँ हम लोग जा रहे हैं । तुम भी हमारे साथ चलो, यहाँ

१४) ब पतिता । १५) ड लोकेति भणितः क्वापि । १६) अ सार्धमासे....नवमासेन वर्धितः । १७) अ केन त्वदुदरम् । १८) अ ब मे for ते ।

त्वमप्येहि सहास्माभिर्मृथा[1] मात्र बुभुक्षया ।
किंचित् कुरूपकारं वा प्रणिगद्येति ते ययुः ॥२०
मया श्रुत्वा वचस्तेषां म[illegible]निवासिना ।
विचिन्तितमिदं चित्ते [illegible]चकितचेतसा ॥२१
संपत्स्यते ऽत्र दुर्भिक्षं वर्षद्वादशकं यदि ।
किं क्षुधा म्रियमाणो ऽहं करिष्ये निर्गतस्तदा ॥२२
चिन्तयित्वेति वर्षाणि गर्भे ऽहं द्वादश स्थितः ।
अशनायाभयग्रस्तैः[1] क्व देही नावतिष्ठते ॥२३
आजग्मुस्तापसा भूयस्ते गर्भमभि तस्थुषि[1] ।
मयि मातामहावासं[2] दुर्भिक्षस्य व्यतिक्रमे ॥२४
प्रणम्य तापसाः पृष्टा ममार्येणाचचक्षिरे ।
सुभिक्षं भद्र संपन्नं प्रस्थिता विषयं निजम् ॥२५
मयि श्रुत्वा वचस्तेषां गर्भतो निर्यियासति[1] ।
अजनिष्ट सवित्री मे वेदनाक्रान्तविग्रहा ॥२६

२०) १. मरिष्यति ।
२३) १. क्षुत्पीडितः ।
२४) १. स्थितवति; क तिष्ठति सति । २. मातामहगृहे ।
२६) १. निर्गतस्य वाञ्छया ।

भूखसे पीड़ित होकर मत मरो, अथवा कुछ उपकार करो; ऐसा कहकर वे सब तापस वहाँसे चले गये ॥१९-२०॥

माताके गर्भमें स्थित रहते हुए जब मैंने तापसोंके इस कथनको सुना तब मैंने मनमें भूखसे भयभीत होकर चित्तमें यह विचार किया कि यदि यहाँ बारह वर्ष तक दुष्काल रहेगा तो वैसी अवस्थामें गर्भसे निकलकर भूखकी बाधासे मरणको प्राप्त होता हुआ मैं क्या करूँगा—इससे तो कहीं गर्भमें स्थित रहना ही ठीक होगा ॥२१-२२॥

यही सोचकर मैं बारह वर्ष तक उस गर्भमें ही स्थित रहा। सो ठीक भी है—भूखके भयसे पीड़ित प्राणी भला कहाँपर नहीं अवस्थित होता है ? अर्थात् वह भूखके भयसे व्याकुल होकर उत्तम व निकृष्ट किसी भी स्थानमें स्थित होकर रहता है ॥२३॥

इस प्रकार मेरे गर्भस्थ रहते हुए उस दुष्कालके बीत जानेपर वे तापस वापस आकर फिरसे मेरे नानाके घरपर आये ॥२४॥

तब मेरे नानाके पूछनेपर वे तापस बोले कि हे भद्र ! अब सुभिक्ष हो चुका है, इसीलिए हम अपने देशमें आ गये हैं ॥२५॥

उनके वचनोंको सुनकर जब मैं गर्भसे निकलनेका इच्छुक होकर निकलने लगा तब माताके शरीरमें बहुत पीड़ा हुई ॥२६॥

२३) अ त्रस्तः for ग्रस्तः । २४) इ मम for मयि; अ ब दुष्कालस्य । २५) अ °मार्येणादिचिक्षरे, ब °मार्येण वचक्षिरे, क पृष्टा आर्येणाथाचचक्षिरे, ड आर्येणाथ ववक्षिरे । २६) अ ड इ निर्यया सति ।

कन्थां क्षिप्त्वा रश्चुल्ल्याः पतिताया विचेतसः।
निर्गत्योदरतो मातुर्निपतामि स्म भस्मनि ॥२७

उत्थाय पात्रमादाय जननी भणिता मया।
देहि मे भोजनं मातः क्षुधितो नितरामहम् ॥२८

आर्यो मम ततः प्राह दृष्टः को ऽपि तपोधनाः।
युष्माभिर्जातमात्रो ऽपि याचमानो ऽत्र भोजनम् ॥२९

तैरुक्तमयमुत्पातो गेहान्निर्घाटयतां स्फुटम्।
भविष्यत्यन्यथा साधो तव विघ्नपरंपरा ॥३०

ततो ऽहं गदितो मात्रा याहि रे यममन्दिरम्।
तापको मम दुर्जातः सं ते दास्यति भोजनम् ॥३१

मयावाचि ततो मातरादेशो मम दीयताम्।
तया न्यगादि याहि त्वं निर्गत्य मम गेहतः ॥३२

ततो ऽहं भस्मना देहमवगुण्ठ्य विनिर्गतः।
ततो मुण्डशिरो भूत्वा तापसस्तापसैः सह ॥३३

२७) १. मातापि।
३१) १. क ड [ढ] पुत्रः। २. यमः।
३३) १. अवलिम्प्य।

तब वह चूल्हेके आगे कथड़ी डालकर अचेत होती हुई पड़ गयी। इस अवस्थामें मैं वहाँ माताके उदरसे निकलकर राखमें गिर गया ॥२७॥

तत्पश्चात् मैं उठा और बरतन लेकर मातासे बोला कि माँ! मैं बहुत भूखा हूँ, मुझे भोजन दे ॥२८॥

उस समय मेरे पूज्य नानाने उन तापसोंसे पूछा कि हे तपोरूप धनके धारक साधु-जन! क्या आप लोगोंने ऐसे किसी व्यक्तिको देखा है जो जन्मसे ही भोजनकी माँग कर रहा हो ॥२९॥

इस प्रश्नके उत्तरमें वे बोले कि यह एक आकस्मिक उपद्रव है। इस बालकको स्पष्ट-तया घरसे निकाल दो, अन्यथा हे सत्पुरुष! तेरे यहाँ विघ्न-बाधाओंकी परम्परा उत्पन्न होगी ॥३०॥

तत्पश्चात् माताने मुझसे कहा कि अरे दुखपूर्वक जन्म लेकर मुझे सन्तप्त करनेवाला कुपूत! जा, तू यमराजके घर जा—मर जा, वही यमराज तेरे लिए भोजन देगा ॥३१॥

इसपर मैंने मातासे कहा कि अच्छा माँ! मुझे आज्ञा दे। तब माताने कहा कि जा, मेरे घरसे निकल जा ॥३२॥

माताके इस आदेशको सुनकर मैं अपने शरीरको भस्मसे आच्छादित करते हुए घरसे

२७) अ क्षुप्त्वा नरश्चुल्ल्या, ब पुरस्तस्याः। २९) अ प्राहुर्दृष्टः। ३०) ब भविष्यत्वन्यथा। अ विघ्नः for विघ्न। ३१) क ड °मन्दिरे; क दुर्जात। ३२) ड त्वगादि। ३३) अ ततो ऽहं गदितो यावदवगुण्ठ्य; अ गतो for ततो।

स्थितो ऽहं तापसस्थाने कुर्वाणो दुष्करं तपः ।
न श्रेयस्कार्यमारभ्य प्रमाद्यन्ति हि पण्डिताः ॥३४
मया गतवता श्रुत्वा साकेतपुरमेकदा ।
माता विवाह्यमाना स्वा वरेणान्येन वीक्षिता ॥३५
विनिवेद्य स्वसंबन्धं मया पृष्टास्तपोधनाः ।
आचक्षते[1] न दोषो ऽस्ति परेणास्या विवाहने ॥३६
द्रौपद्याः पञ्च भर्तारः कथ्यन्ते यत्र पाण्डवाः ।
जनन्यास्तव को दोषस्तत्र भर्तृद्वये सति ॥३७
एकदा[1] परिणीतापि विपन्ने[2] दैवयोगतः ।
भर्तर्यक्षतयोनिः[3] स्त्री पुनः संस्कारमर्हति[4] ॥३८
प्रतीक्षेताष्ट[1] वर्षाणि प्रसूता वनिता सती ।
अप्रसूता तु चत्वारि प्रोषिते[2] सति भर्तरि ॥३९
पञ्चस्वेषु गृहीतेषु कारणे सति भर्तृषु ।
न दोषो विद्यते स्त्रीणां व्यासादीनामिदं वचः ॥४०

३६) १. ते सर्वे ब्रुतः । (?)
३८) १. एकवारम् । २. मृते । ३. अभग्नयोनि । ४. विवाहम् ।
३९) १. मार्गम् अवलोकयति । २. प्रदेशे वसिते; क मरणे ।

निकल पड़ा । फिर मैं सिरको मुड़ाकर तापस हो गया और तापसोंके साथ चल दिया ॥३३॥

इस प्रकार तापसोंके साथ जाकर मैं कठोर तपको करता हुआ तापसाश्रममें स्थित हो गया । सो ठीक भी है, क्योंकि, पण्डित जन जिस कल्याणकारी कार्यको प्रारम्भ करते हैं उसके पूरा करनेमें वे कभी प्रमाद नहीं किया करते हैं ॥३४॥

एक बार मैं अयोध्यापुरीमें गया और वहाँ, जैसा कि मैंने सुना था, अपनी माताको दूसरे वरके द्वारा विवाहित देख लिया ॥३५॥

तत्पश्चात् मैंने अपने सम्बन्धमें निवेदन करके—अपने पूर्व वृत्तको कहकर—उसके विषयमें तापसोंसे पूछा । उत्तरमें वे बोले कि उसके दूसरे वरके साथ विवाह कर लेनेमें कोई दोष नहीं है । कारण कि जहाँ द्रौपदीके पाँच पाण्डव पति कहे जाते हैं वहाँ तेरी माताके दो पतियोंके होनेपर कौन-सा दोष है ? कुछ भी दोष नहीं है । एक बार विवाहके हो जानेपर भी यदि दुर्भाग्यसे पति विपत्तिको प्राप्त होता है—मर जाता है—तो वैसी अवस्थामें अक्षत-योनि स्त्रीका—यदि उसका पूर्व पतिके साथ संयोग नहीं हुआ है तो उस अवस्थामें—फिरसे विवाह हो सकता है, अर्थात् उसमें कोई दोष नहीं है । पतिके प्रवासमें रहनेपर प्रसूत स्त्रीको—जिसके सन्तान उत्पन्न हो चुकी है उसको—आठ वर्ष तक तथा सन्तानोत्पत्तिसे रहित अप्रसूत स्त्रीको चार वर्ष तक पतिके आगमनकी प्रतीक्षा करनी चाहिए—तत्पश्चात् उसके पुनर्विवाह

३४) अ च for हि । ३५) ब क इ स्मृत्वा for श्रुत्वा । ३६) ब दृष्टास्तपो° । ३७) क पञ्च for यत्र । ३९) ब अप्रसूतात्र । ४०) ब पञ्चकेषु ।

ऋषीणां वचसानेन ज्ञात्वा मातुरदोषताम् ।
एकान्तस्थस्तपः कुर्वन् वत्सरं तापसाश्रमे ॥४१
महीमटाट्यमानो ऽहं तीर्थयात्रापरायणः ।
ततः पत्तनमायातो युष्मदीयमिदं द्विजाः ॥४२
आचचक्ष ततो विप्राः कोपविस्फुरिताधराः ।
ईदृशं शिक्षितं दुष्ट क्वासत्यं जल्पितं त्वया ॥४३
कृत्वैकत्रानृतं सर्वं नूनं त्वं वेधसा कृतः ।
असंभाव्यानि कार्याणि परथा भाषसे कथम् ॥४४
आचष्टे स्म ततः खेटो विप्राः किं जल्पथेदृशम् ।
युष्माकं किं पुराणेषु कार्यमीदृङ् न विद्यते ॥४५
ततो ऽभाष्यत भूदेवैरीदृशं यदि वीक्षितम् ।
त्वया वेदे पुराणे वा क्वचिद्भद्र तदा वद ॥४६
आख्यत्खेटो द्विजा वच्मि परं युष्मद्बिभेम्यहम् ।
विचारेण विना यूयं चेद् गृह्णीथाखिलं वचः ॥४७

कर लेनेमें कोई दोष नहीं है। इस प्रकार कारणके रहते हुए स्त्रियोंके उन पाँच पतियों तकके स्वीकार करने पर कोई दोष नहीं होता। यह व्यास आदि महर्षियोंका कहना है ॥३६-४०॥

ऋषियोंके इस उत्तरसे अपनी माताकी निर्दोषताको जानकर मैं एक वर्ष तक तप करता हुआ उसी तापसाश्रममें स्थित रहा ॥४१॥

तत्पश्चात् हे ब्राह्मणो ! मैं तीर्थयात्रामें तत्पर होकर पृथिवीपर विचरण करता हुआ आपके इस नगरमें आया हूँ ॥४२॥

तापस वेषधारी उस मनोवेगके इस आत्म-वृत्तान्तको सुनकर क्रोधके वश अधरोष्ठको कँपाते हुए वे ब्राह्मण बोले कि अरे दुष्ट ! तूने इस प्रकारका असत्य बोलना कहाँसे सीखा है। हमें ऐसा प्रतीत होता है कि निश्चयतः समस्त असत्यको एकत्र करके ही ब्रह्मदेवने तुझे निर्मित किया है। कारण कि यदि ऐसा न होता तो जो कार्य सर्वथा असम्भव है उनका कथन तू कैसे कर सकता था ? नहीं कर सकता था ॥४३-४४॥

ब्राह्मणोंके इस कथनको सुनकर मनोवेग विद्याधर बोला कि हे ब्राह्मणो ! ऐसा आप क्यों कहते हैं, क्या आपके पुराणोंमें इस प्रकारके कार्यका उल्लेख नहीं है ? अवश्य है ॥४५॥

इसपर ब्राह्मणोंने कहा कि हे भद्र ! तुमने यदि कहीं वेद अथवा पुराणमें ऐसा उल्लेख देखा है तो उसे कहो ॥४६॥

इसपर मनोवेग बोला कि हे विप्रो ! मैं जानता हूँ व कह भी सकता हूँ। परन्तु जो आप लोग विचार करनेके विना ही सब कथनको ग्रहण करते हैं उनसे मैं डरता हूँ ॥४७॥

४१) ब एकान्तस्थम् । ४२) अ महीमठाद्यमानो; ब युष्मदीयमिति । ४३) ब दुष्टं, ब क जल्पितुम् । ४४) क कुतः for कृतः । ४६) क भाषितभूंदेवै° । ४७) अ वेद्मि for वच्मि; अ ब क ड परं तेभ्यो बिभे°; अ ये गृह्णीयात्खिलं, ब ये गृह्णीथाखिलं, क यदगृह्णीथाखिलं, ड चेदगृह्णीयाखिलम् ।

येषां वेदपुराणेषु ब्रह्महत्या पदे पदे ।
ते गृह्णीथ कथं यूयं कथ्यमानं सुभाषितम् ॥४८
पुराणं मानवो धर्मः[1] साङ्गो वेदश्चिकित्सितम्[2] ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥४९
मनुव्यासवसिष्ठानां वचनं वेदसंयुतम् ।
अप्रमाणयतः पुंसो ब्रह्महत्या दुरुत्तरा ॥५०
हेतुर्निवार्यते[1] तत्र दूषणं[2] यत्र[3] विद्यते ।
को ऽपि त्रस्यति निर्दोषे तप्यमाने ऽपि काञ्चने ॥५१
अवादि वैदिकैर्भद्र[1] वाच्यतः[2] पातकं कुतः ।
निशातो गदितः खड्गो लुनीते रसनां न हि ॥५२

४९) १. मनुस्मृतिः । २. वैद्यकशास्त्र ।
५१) १. विचारम् । २. ब्रह्महत्यादिर्भवेत् । ३. देवादौ ।
५२) १. ब्राह्मणैः वेदस्य भावो वेदः, तैः वैदिकैः । २. कथनात् ।

जिनके वेद और पुराणोंमें पद-पद (पग-पग) पर—अनेक स्थलोंपर—ब्रह्महत्या (प्राणि-हिंसा या ब्राह्मणघात) पायी जाती है उनके आगे यदि सुन्दर (यथार्थ) भाषण भी किया जाये तो भी वे उसे कैसे ग्रहण कर सकते हैं ? अर्थात् वे उसे स्वीकार नहीं कर सकते हैं ॥४८॥

आपके यहाँ कहा गया है कि पुराण, मानव धर्म—मनुके द्वारा मनुस्मृतिमें प्ररूपित अनुष्ठान, अंगसहित वेद और चिकित्सा (आयुर्वेद) ये चारों आज्ञासिद्ध हैं—उन्हें आज्ञा-रूपसे ही स्वीकार किया जाना चाहिए। उनका युक्तियोंके द्वारा खण्डन करना योग्य नहीं है ॥४९॥

तथा मनु, व्यास और वशिष्ठ इन महर्षियोंके वचन वेदका अनुसरण करनेवाले हैं। इसलिए जो पुरुष उनके कथनको अप्रमाण मानता है उसे अनिवार्य ब्रह्महत्याका दोष लगता है ॥५०॥

जहाँ दोष विद्यमान होता है वहाँ युक्तिको रोका जाता है। सो यह ठीक नहीं, क्योंकि सुवर्णके तपाये जानेपर कोई भी विचारक त्रस्त नहीं होता है—उसकी निर्दोषता प्रत्यक्षसिद्ध होनेपर उसके लिए कोई भी परीक्षणका कष्ट नहीं किया करता है। अभिप्राय यह है कि जिस प्रकार सुवर्णके तपाये जानेपर किसीको भी उसकी निर्दोषतामें सन्देह नहीं रहता है। उसी प्रकार पुराण एवं धर्म आदिकी युक्तियों द्वारा परीक्षा हो जानेपर उनकी भी निर्दोषतामें किसीको सन्देह नहीं रह सकता है, अतएव उनके विषयमें युक्तियोंका निषेध करना उचित नहीं कहा जा सकता है ॥५१॥

[illegible] इस कथनको सुनकर वेदको प्रमाण माननेवाले वे ब्राह्मण बोले कि हे भद्र ! केवल वचनमात्रसे दोषके प्रदर्शित करनेपर वस्तुतः दोष कहाँसे हो सकता है ? नहीं हो सकता है। उदाहरणार्थ—'तलवार तीक्ष्ण है' ऐसा उच्चारण करनेसे ही वह जीभको नहीं काट डालती है ॥५२॥

---

५०) अ ड अप्रमाणं यतः । ५१) अ क ड ताप्यमाने; अ ब न for अपि ।

वचनोच्चारमात्रेण कल्मषं यदि जायते ।
तदोष्णो वह्निरित्युक्ते वचनं किं न दह्यते ॥५३

आचक्ष्व त्वं पुराणार्थं यथावृ[illegible]ः ।
वयं नैयायिकाः सर्वे गृह्णीमो न्यायभाषितम् ॥५४

ततः स्वपरशास्त्रज्ञो व्याचष्टे गगनायनः ।
यद्येवं श्रूयतां विप्राः स्पष्टयामि मनोगतम् ॥५५

एकत्र सुप्तयोर्नार्योर्भागीरथ्याख्ययो[illegible]योः ।
संपन्नगर्भयोः पुत्रः ख्यातो ऽजनि भगीरथिः ॥५६

यदि स्त्रीस्पर्शमात्रेण गर्भः संभवति स्त्रियाः ।
मातुर्मे न कथं जातः [illegible]स्पर्शतस्तदा ॥५७

धृतराष्ट्राय गान्धारी द्विमासे किल दास्यते ।
तावद्रजस्वला जाता पूर्वं सा संप्रदानतः ॥५८

चतुर्थे वासरे स्नात्वा पनसालिङ्गने कृते ।
वर्धयन्नुदरं तस्या गर्भो ऽजनि महाभरः ॥५९

५४) १. कथय । २. न्यायकाः ।
५५) १. मनोवेगः ।
५८) १. विवाहात् ।

यदि वचनके उच्चारणमात्रसे ही दोषकी सम्भावना होती तो फिर 'अग्नि उष्ण है' ऐसा कहनेपर मुँह क्यों नहीं जल जाता है ? ॥५३॥

इसलिए हे भद्र ! यदि हमारे पुराणोंमें कहीं वस्तुतः कोई दोष है तो उसका केवल वचन मात्रसे उल्लेख न करके जहाँ वह दोष विद्यमान हो उस पुराणके अर्थको तुम हमें निर्भयता-पूर्वक कहो । हम सब नैयायिक हैं—न्यायका अनुसरण करनेवाले हैं, इसीलिए न्यायोचित भाषणको ग्रहण किया करते हैं ॥५४॥

इसपर अपने व दूसरोंके आगमके रहस्यको जाननेवाले उस मनोवेग विद्याधरने कहा कि यदि आप न्याय्य वचनोंके ग्रहण करनेवाले हैं तो फिर मैं अपने हृदयगत अभिप्रायको कहता हूँ, उसे सुनिए ॥५५॥

भागीरथी नामकी दो स्त्रियाँ एक स्थानपर सोयी हुई थीं, इससे उनके गर्भाधान होकर प्रसिद्ध भगीरथ नामका पुत्र उत्पन्न हुआ, यह आपके पुराणोंमें वर्णित है ॥५६॥

यदि स्त्रीके स्पर्शमात्रसे अन्य स्त्रीके गर्भस्थिति हो सकती है तो फिर मेरी माताके पुरुषके स्पर्शसे गर्भस्थिति क्यों नहीं हो सकती है, यह आप ही बतलायें ॥५७॥

धृतराष्ट्रके लिए गान्धारी दो मासमें दी जानेवाली थी, सो उसे देनेके पूर्व ही वह रजस्वला हो गयी । तब उसने चौथे दिन स्नान करके पनस वृक्षका आलिंगन किया । इससे उसके अतिशय भारसे संयुक्त गर्भ रह गया व पेट बढ़ने लगा ॥५८-५९॥

५३) इ दह्यति । ५५) क आचष्टे, ड व्याचष्ट । ५६) इ भगीरथः । ५९) ब ज्ञात्वा for स्नात्वा.... वर्धयन्युदरम् ।

धृतराष्ट्राय सा दत्ता पित्रा गर्भावलोकने ।
लोकापवादनोदाय सर्वो ऽपि यतते जनः ॥६०

यदूढया[1] तया जातं पनसस्य[2] फलं परम् ।
बभूव जठरे तस्य पुत्राणां शतमूर्जितम् ॥६१

खेटः प्राह किमीदृक्षः पुराणार्थो ऽस्ति वा न वा ।
ते प्राहुर्नितरामस्ति को भद्रेमं निषेधति ॥६२

पनसालिङ्गने पुत्राः सन्तीत्यवितथं[1] यदि ।
तदा नृस्पर्शतः पुत्रप्रसूतिर्वितथा[2] कथम् ॥६३

श्रुत्वेति वचनं तस्य भाषितं द्विजपुंगवैः ।
त्वं भर्तृस्पर्शतो जातो भद्र सत्यमिदं वचः ॥६४

तापसोयं वचः श्रुत्वा वर्षद्वादशकं स्थितः ।
जनन्या जठरे नेदं प्रतिपद्यामहे[1] परम् ॥६५

जगाद खेचरः पूर्वं सुभद्राया[1] मुरद्विषा[2] ।
चक्रव्यूहप्रपञ्चस्य व्यधीयत निवेदनम्[3] ॥६६

---

६१) १. क धृतराष्ट्रपरिणीतया । २. फणसवृक्षस्य ।
६३) १. सत्यम् । २. असत्यम् ।
६५) १. न मन्यामहे ।
६६) १. भगिन्याः । २. कृष्णेन । ३. कथनम् ।

तब पिताने उसके गर्भको देखकर उसे धृतराष्ट्रके लिये दे दिया—उसके साथ वैवाहिक विधि सम्पन्न करा दी। ठीक है—लोकनिन्दासे बचनेके लिए सब ही जन प्रयत्न किया करते हैं ॥६०॥

पश्चात् धृतराष्ट्रके द्वारा परिणीत उसने जिस विशाल पनसके फलको उत्पन्न किया उसके मध्यमें सौ पुत्र वृद्धिंगत हुए थे ॥६१॥

इस प्रकार पुराणके वृत्तको कहता हुआ मनोवेग विद्याधर बोला कि हे विप्रो! क्या आपके पुराणोंमें इस प्रकारका वृत्त है कि नहीं है। इसपर वे ब्राह्मण बोले कि हे भद्र! पुराणोंमें इस प्रकारका वृत्तान्त अवश्य है, उसका निषेध कौन करता है ॥६२॥

उनके इस उत्तरको सुनकर मनोवेगने कहा कि जब पनसके साथ आलिंगन होनेपर पुत्र हुए, यह सत्य है तब पुरुषके स्पर्शसे पुत्रकी उत्पत्तिको असत्य कैसे कहा जा सकता है ? ॥६३॥

मनोवेगके इस कथनको सुनकर वे श्रेष्ठ ब्राह्मण बोले कि हे भद्र ! पतिके स्पर्श मात्रसे तुम उत्पन्न हुए हो, यह तुम्हारा कहना सत्य है। परन्तु उन तापसोंके वचनको सुनकर तुम बारह वर्ष तक माताके पेटमें ही स्थित रहे, इसे हम स्वीकार नहीं कर सकते हैं ॥६४-६५॥

यह सुनकर मनोवेग बोला कि पूर्व समयमें कृष्णने अपनी बहन सुभद्राके लिये चक्रव्यूहके विस्तारके सम्बन्धमें निवेदन किया था—उसे चक्रव्यूहकी रचना और उसके

---

६१) ड वरं for परम्; अ ड तस्याः for तस्य । ६३) इ सन्तीति कथितम् । ६६) अ इ विधीयेत, ड विधीयते ।

तदाभावि[1] कथं मातुर्गर्भस्थेनाभिमन्युना[2] ।
कथं मया न भूदेवास्तापसानां वचः पुनः ॥६७

मयेने[1] मुनिना धौते स्वकौपीने सरोवरे ।
पीतः शुक्ररसो ऽभ्येत्य[2] मण्डूक्या सलिलस्थया ॥६८

तदीयपानतो गर्भे संपन्ने सति दर्दुरी ।
सासूत सुन्दरीं कन्यां संपूर्णे समये सति ॥६९

न जातेरस्मदीयाया योग्येयं शुभलक्षणा ।
इति ज्ञात्वा तया क्षिप्ता मण्डूक्या नलिनीदले ॥७०

एकदा यतिना दृष्ट्वा सा सरोवरमीयुषा ।
स्वीकृता स्नेहतो ज्ञात्वा स्वबीजबलसंभवा ॥७१

उपायैर्विविधैस्तेन[1] सा प्रपाल्य विवर्धिता ।
अपत्यपालने सर्वो[2] निसर्गेण प्रवर्तते ॥७२

६७) १. कथनम् । २. क पुत्रेण ।
६८) १. नाम । २. एत्य ।
७२) १. मयेन । २. जनः प्राणी ।

भीतर प्रवेश करनेकी विधिको समझाया था। उसे उस समय माताके गर्भमें स्थित अभिमन्युने कैसे सुन लिया था और हे ब्राह्मणो ! मैं माताके गर्भमें स्थित रहकर तापसोंके कथनको क्यों नहीं सुन सकता था—जिस प्रकार गर्भस्थ अभिमन्युने चक्रव्यूहके वृत्तको सुन लिया था उसी प्रकार मैंने भी माताके गर्भमें रहते हुए तापसोंके कथनको सुन लिया था ॥६६-६७॥

मय नामक ऋषिने जब अपने लंगोटको तालाबमें धोया था तब उसमेंसे जो वीर्यका अंश प्रवाहित हुआ उसे पानीमें स्थित एक मेंढकीने आकर पी लिया था। उसके पीनेसे उस मेंढकीके गर्भ रह गया और तब उस सतीने समयके पूर्ण हो जानेपर एक सुन्दर कन्याको जन्म दिया था ॥६८-६९॥

पश्चात् उस मेंढकीने यह जानकर कि यह उत्तम लक्षणोंवाली कन्या हमारी जातिके योग्य नहीं है, उसे एक कमलिनीके पत्तेपर रख दिया ॥७०॥

एक समय मय ऋषि उस तालाबके ऊपर पुनः पहुँचे। तब वहाँ उन्होंने उसे देखा और अपने वीर्यके प्रभावसे उत्पन्न हुई जानकर स्नेहके वश ग्रहण कर लिया ॥७१॥

तत्पश्चात् उन्होंने नाना प्रकारके उपायों द्वारा उसका पालन-पोषण कर वृद्धिंगत किया। सो ठीक भी है, क्योंकि, अपनी सन्तानके परिपालनमें सब ही जन स्वभावतः प्रवृत्त हुआ करते हैं ॥७२॥

६७) क ड तदभावि । ६८) अ इ यमेन for मयेन; ड सलिलेस्थया । ६९) ब सुन्दराम् । ७०) क इति मत्वा । ७१) क इ स्ववीर्य° ।

उदक्यया[1] तया तस्य[2] कौपीनं शुक्रकश्मलम् ।
परिधाय कृतं स्नानं कदाचिद्यौवनोदये ॥७३

जातं तस्यास्ततो गर्भं विज्ञाय निजवीर्यजम् ।
तं[1] मुनिः स्तम्भयामास कन्यादूषणशङ्कितः ॥७४

सप्तवर्षसहस्राणि गर्भो ऽसौ निश्चलीकृतः ।
अतिष्ठदुदरे तस्याः कुर्वाणः पीडनं परम् ॥७५

परिणीता ततो भव्या रावणेन महात्मना ।
वितीर्णा मुनिनासूत पुत्रमिन्द्रजिताभिधम् ॥७६

पूर्वमिन्द्रजिते जाते सप्तवर्षसहस्रकैः ।
बभूव रावणः पश्चात् ख्यातो मन्दोदरीपतिः ॥७७

सप्तवर्षसहस्राणि कथमिन्द्रजितः स्थितः ।
सवित्रीजठरे नाहं वर्षद्वादशकं कथम् ॥७८

---

७३) १. रजस्वलया कन्यया । २. मयस्य ।

७४) १. गर्भम् ।

किसी समय वह यौवन अवस्थाके प्रादुर्भूत होनेपर रजस्वला हुई । उस समय उसने वीर्यसे मलिन पिताके लंगोटको पहनकर स्नान किया । इससे उसके गर्भाधान हो गया । तब मय मुनिने उस गर्भको अपने वीर्यसे उत्पन्न जानकर कन्याप्रसंगरूप लोकनिन्दाके भयसे उसे स्तम्भित कर दिया—वहींपर स्थिर कर दिया ॥७३-७४॥

इस प्रकार मुनिके द्वारा उस गर्भको सात हजार वर्ष तक निश्चल कर देनेपर वह कन्याको केवल पीड़ा उत्पन्न करता हुआ तब तक उसके उदरमें ही अवस्थित रहा ॥७५॥

तत्पश्चात् ऋषिने उस सुन्दर कन्याको अतिशय शोभासे सम्पन्न रावणके लिए प्रदान कर दिया, जिसे उसने स्वीकार कर लिया । तब उसने इन्द्रजित् नामक पुत्रको जन्म दिया ॥७६॥

पूर्वमें जब इन्द्रजित् उत्पन्न हो चुका तब कहीं सात हजार वर्षोंके पश्चात् रावण मन्दोदरीके पतिस्वरूपसे प्रसिद्ध हुआ ॥७७॥

इस प्रकार हे विद्वान् विप्रो ! यह कहिए कि वह इन्द्रजित् सात हजार वर्ष तक कैसे माताके उदरमें अवस्थित रहा और मैं केवल बारह वर्ष तक ही क्यों नहीं माताके उदरमें रह सकता था ॥७८॥

---

७३) ड ततः for कृतम् । ७४) अ निजबीजनम् । ७६) अ ब महाश्रिया । ७७) ड जातो for ख्यातो ।

अजल्पुर्याज्ञिकाः साधो तव सत्यमिदं वचः ।
त्वमुत्पन्नमात्रेण तपो ऽग्राहि कथं त्वया ॥७९
परिणीताभवत् कन्या कथं ते जननी पुनः ।
सुदुर्घटमिदं ब्रूहि संदेहध्वान्तविच्छिदे ॥८०
नभश्चरो ऽवदद्वच्मि श्रूयतामवधानतः ।
पाराशरो ऽजनिष्टात्र तापसैस्तापसार्चितः ॥८१
असावुत्तरितुं नावा कैवर्त्या वाह्यमानया ।
प्रविष्टः कन्यया गङ्गां नवयौवनदेहया ॥८२
तामेष भोक्तुमारेभे दृष्ट्वा तारुण्यशालिनीम् ।
पुष्पायुधशरैर्भिन्नः स्थानास्थाने न पश्यति ॥८३
चकमे सापि तं बाला शापदानविभीलुका ।
अकृत्यकरणेनापि सर्वो रक्षति जीवितम् ॥८४

८३) १. पारासरः ।
८४) १. स्रापदानभीता ।

मनोवेगके इस कथनको सुनकर यज्ञकर्ता ब्राह्मण बोले कि हे साधो ! यह तुम्हारा कहना सत्य है । परन्तु यह कहो कि उत्पन्न होते ही तुमने तपको ग्रहण कैसे कर लिया ॥७९॥

इसके अतिरिक्त तुम्हारी माता तुमको जन्म देकर कन्या कैसे रही और तब वैसी अवस्थामें उसका पुनः विवाह कैसे सम्पन्न हुआ, यह अतिशय असंगत है । इस सब सन्देह-रूप अन्धकारको नष्ट करनेके लिए हमें उत्तर दो ॥८०॥

इसपर मनोवेगने कहा कि यह भी मैं जानता हूँ । मैं उसे कहता हूँ, सावधान होकर सुनिए—यहाँ अन्य तापस जनोंसे पूजित—सब तापसोंमें श्रेष्ठ—एक पारासर नामका तापस हुआ है ॥८१॥

वह जिस नावसे गंगा नदीको पार करनेके लिए उसके भीतर प्रविष्ट हुआ उसे एक नवीन यौवनसे विभूषित शरीरवाली धीवर कन्या चला रही थी ॥८२॥

उसे यौवनसे विभूषित देखकर पारासर कामके बाणोंसे विद्ध हो गया । इससे उसने उस कन्याको भोगना प्रारम्भ कर दिया । सो ठीक है—कामके बाणोंसे विद्ध हुआ प्राणी योग्य और अयोग्य स्थानको—स्त्रीकी उच्चता व नीचताको नहीं देखा करता है ॥८३॥

शाप देनेके भयसे भीत होकर उस धीवर कन्याने भी उसे स्वीकार कर लिया । सो ठीक है, क्योंकि, सब ही प्राणी अयोग्य कार्य करके भी प्राणोंकी रक्षा किया करते हैं ॥८४॥

७९) क तदसत्य°; अ अजल्पि । ८१) इ °वदद्वाग्मी । ८३) अ स्थाने स्थाने । ८४) ब चकमे सा पतिम्....जीवितुम् ।

तपःप्रभावतो ऽकारि तेन तत्र तमस्विनी[1] ।
सामग्रीतो विना कार्यं किंचनापि न सिध्यति ॥८५

सुरतानन्तरं जातस्तयोर्व्यासः शरीरजः ।
याचमानो ममादेशं देहि तातेति भक्तितः ॥८६

अत्रैव वत्स[1] तिष्ठ त्वं कुर्वाणः पावनं तपः ।
पाराशरो ददौ तस्मै नियोगं[2]मिति तुष्टधीः ॥८७

भूयो [illegible]न्यां सौगन्ध्यव्याप्तदिङ्मुखाम् ।
अगात् पाराशरः कृत्वा कुमारीं योग्यमाश्रमम् ॥८८

तापसः पितुरादेशाज्जननानन्तरं कथम् ।
व्यासो मातुरहं नास्मि कथमेतद्विचार्यताम् ॥८९

धीवरी जायते कन्या व्यासे ऽपि तनये सति ।
मयि माता न मे ऽत्रास्ति किं परं पक्षपाततः ॥९०

---

८५) १. रात्रिः ।
८७) १. हे । २. आदेशः ।

उस समय पारासर ऋषिने वहाँ तपके प्रभावसे दिनको रात्रिमें परिणत कर दिया। ठीक भी है, क्योंकि, सामग्रीके विना कोई भी कार्य सिद्ध नहीं होता है ॥८५॥

सम्भोगके पश्चात् उन दोनोंके व्यास पुत्र उत्पन्न हुआ। उसने 'हे पूज्य पिता! मुझे आज्ञा दीजिए' इस प्रकार भक्तिपूर्वक पितासे याचना की ॥८६॥

इसपर पिता पारासरने सन्तुष्ट होकर उसे 'हे वत्स! तुम पवित्र तपका आचरण करते हुए यहींपर स्थित रहो' इस प्रकारकी आज्ञा दी ॥८७॥

फिर पारासर ऋषि उस धीवर कन्याको अपनी सुगन्धिसे दिङ्मण्डलको व्याप्त करनेवाली योजनगन्धा नामकी कुमारी करके अपने योग्य आश्रमको चले गये ॥८८॥

इस प्रकार वह व्यास जन्म लेनेके पश्चात् पिताकी आज्ञासे कैसे तापस हो सकता है और मैं जन्म लेनेके पश्चात् माताकी आज्ञासे क्यों नहीं तापस हो सकता हूँ, इसपर आप लोग विचार करें ॥८९॥

इसी प्रकार व्यास पुत्रके उत्पन्न होनेपर भी वह धीवरकी पुत्री तो कन्या रह सकती है और मेरी माता मेरे उत्पन्न होनेपर कन्या नहीं रह सकती है, यह पक्षपातको छोड़कर और दूसरा क्या हो सकता है—यह केवल पक्षपात ही है ॥९०॥

---

८६) ब भाक्तिकः । ८७) क ड इ तिष्ठ वत्स; अ [illegible]; ब रुष्टधीः । ८८) अ सुत्वा for कृत्वा ।
८९) इ जननानन्तरः । ९०) ब न for किम् ।

आदित्यसंगेन सुते ऽपि जाते भूयो ऽपि कुन्ती भवति स्म कन्या ।
माता मदीया न कथं मयीदं [illegible] यं मनसा महद्भिः ॥९१
उद्दालकर्षिः सुरनिम्नगायां स्वप्ने स्वशुक्रं क्षरितं गृहीत्वा ।
महातपाः सर्वजनप्रसिद्धश्चकार पङ्केरुहपत्रसंस्थम् ॥९२
देवीव [illegible] कुमारी रघोः[1] सखीभिर्गुणराजधानी ।
शरीरजा चन्द्रमतीति नाम्ना रजस्वला स्नातुमियाय गङ्गाम् ॥९३
आघ्रायमाणे कमले कुमार्याः शुक्रं प्रविष्टं जठरे तदस्याः ।
शुक्तेरिवाम्भो भवति स्म गर्भ आप्यायमानो ऽखिलदेहयष्टिम् ॥९४
विलोक्य तां गर्भवतीं सवित्र्या निवेद्यमानां तरसा क्षितीशः ।
निव[illegible] वनान्तराले त्रस्यन्ति सन्तो गृहदूषणेभ्यः ॥९५
मुनेर्निवासे तृणबिन्दुनाम्नः सा नागकेतुं तनयं कुमारी ।
असूत दुर्नीतिरिवार्थनाशं विशुद्धकीर्तिव्यपघातहेतुम्[1] ॥९६

९३) १. राज्ञः ।
९६) १. नाशहेतुम् ।

सूर्यके संयोगसे पुत्रके उत्पन्न हो जानेपर भी जब कुन्ती फिर भी कन्या बनी रही तब मेरे उत्पन्न होनेपर मेरी माता क्यों नहीं कन्या रह सकती है, यह महाजनोंको अन्तःकरणसे विचार करना चाहिए ॥९१॥

महान् तपस्वी व सर्व जनोंमें सुप्रसिद्ध उद्दालक ऋषिका जो वीर्य स्वप्नमें स्खलित हो गया था उसे लेकर उन्होंने गंगा नदीमें कमलपत्रके ऊपर अवस्थित कर दिया ॥९२॥

उधर गुणोंकी राजधानीस्वरूप—उनकी केन्द्रभूत—व 'चन्द्रमती' नामसे प्रसिद्ध रघु राजाकी कुमारी पुत्री रजस्वला होनेपर स्नानके लिए अपनी सखियोंके साथ गंगा नदीपर गयी। वह वहाँ जाती हुई ऐसी सुशोभित हो रही थी जैसे मानो देवियोंके साथ देवी—इन्द्राणी—ही जा रही हो ॥९३॥

वहाँपर कुमारी चन्द्रमतीने जैसे ही उस कमलको सूँघा वैसे ही उसके ऊपर स्थित उद्दालक ऋषिका वह वीर्य उसके उदरके भीतर प्रविष्ट हो गया। इससे जिस प्रकार शुक्तिके भीतर जलके प्रविष्ट होनेपर उसके गर्भ हो जाता है उसी प्रकार वह वीर्य चन्द्रमतीके समस्त शरीरमें प्रविष्ट होकर गतिशील होता हुआ गर्भके रूपमें परिणत हो गया ॥९४॥

तब उसे गर्भवती देखकर उसकी माताने इसकी सूचना राजा रघुसे की, जिससे राजाने उसे वनके मध्यमें स्थापित करा दिया। ठीक है—सत्पुरुष घरके दूषणोंसे अधिक पीड़ित हुआ करते हैं ॥९५॥

तत्पश्चात् कुमारी चन्द्रमतीने तृणबिन्दु नामक मुनिके निवासस्थानमें निर्मल कीर्तिके नाशके कारणभूत नागकेतु नामक पुत्रको इस प्रकारसे उत्पन्न किया जिस प्रकार कि दुष्ट नीति धननाशको उत्पन्न किया करती है ॥९६॥

९१) ब मदीयं for मयीदम् । ९३) ब देवी च । ९५) क ड इ. °मानस्तरसा । ९६) क नाककेतुम् ।

गवेषय स्वं पितरं व्रज त्वं बाला निगद्येति विखिन्नचि .। ।
मञ्जूषयामो विनिवे ्य बालं प्रवाहयामास सुरापगायाम् ॥९७

दृष्ट्वा तरन्तीं त्रिदशापगाया-द्दालकस्तामवतार्य[1] सद्यः ।
स्वबीजजं पुत्रमवेत्य[2] तस्या मध्ये स जग्राह विशुद्धबोधः ॥९८

तत्रागतां चन्द्रमतीं कुमारीं विमार्गय- ीं तनयं विलोक्य ।
प्रदर्श्य तं[1] तां[2] निजगाद बाले ्तुष्टस्तवाहं भव मे प्रिया त्वम् ॥९९

साचष्ट साधो जनकेन दत्ता भवामि कान्ता तव निश्चिताहम् ।
त्वं गच्छ तं[1] प्रार्थय मुक्तशङ्कः स्वयं न गृह्णन्ति पतिं कुलीनाः ॥१००

---

९७) १, क सह ।
९८) १. उत्तार्य । २. ज्ञात्वा ।
९९) १. तं तनयम् । २. चन्द्रमतीं ताम् ।
१००) १. पितरम् ।

इस पुत्रोत्पत्तिसे मनमें खेदको प्राप्त होकर कुमारी चन्द्रमतीने 'जा, तू अपने पिताको खोज' ऐसा कहते हुए बालकको एक पेटीमें रखकर उसके साथ उसे गंगामें प्रवाहित कर दिया ॥९७॥

उधर गंगामें तैरती हुई उस पेटीको देखकर उद्दालक मुनिने उसे उसमें-से शीघ्र निकाल लिया तथा अपने निर्मल ज्ञानके द्वारा उसके भीतर अपने ही वीर्यसे उत्पन्न पुत्रको अवस्थित जानकर उसे ग्रहण कर लिया ॥९८॥

पश्चात् जब वहाँ पुत्रको खोजती हुई कुमारी चन्द्रमती आयी तब उसे देखकर उस पुत्रको दिखलाते हुए उद्दालक ऋषिने उससे कहा कि हे बाले! मैं तेरे ऊपर सन्तुष्ट हूँ, तू मेरी वल्लभा हो जा ॥९९॥

इसपर कुमारी चन्द्रमती बोली कि हे मुने! यदि मेरा पिता मुझे तुम्हारे लिए प्रदान कर देता है तो मैं निश्चित ही तुम्हारी पत्नी हो जाऊँगी। इसलिए तुम जाओ और निर्भय होकर पितासे याचना करो। कारण यह कि उन्नत कुलकी कन्याएँ स्वयं ही पतिका वरण नहीं किया करती हैं, किन्तु वे अपने माता-पिता आदिकी सम्मतिपूर्वक ही उसे वरण किया करती हैं ॥१००॥

---

९७) ब मञ्जूषायां मां विनिवेशगालम्; अ इ प्रवेशयामास । ९८) इ °मवतीर्य.... स्वबीर्यजम् । ९९) इ तत्रागमच्चन्द्रमती कुमारीं विमार्गती सा.... बालाम् । १००) ब तां प्रार्थय; इ गृह्णाति....कुलीना ।

गत्वा तत्र तपोधनो ऽमितगतिस्तां प्रार्थ्य भूमीश्वरं
लब्ध्वा चन्द्रमतीं महागुणवतीं चक्रे प्रियामात्मनः ।
आनन्देन विवाह्य यौवनवतीं कृत्वा कुमारीं पुनः
किं प्राणी न करोति मन्मथ [illegible]भिन्नः समं पञ्चभिः ॥१०१

इति धर्मप[illegible]क्षायाममितगतिकृतायां चतुर्दशः परिच्छेदः ॥१४॥

तदनुसार अपरिमित ज्ञानवाले उस उद्दालक मुनिने रघु राजाके पास जाकर उससे चन्द्रमतीकी याचना की और तब उत्तम गुणोंसे संयुक्त उस युवतीको फिरसे कन्या बनाकर आनन्दपूर्वक उसके साथ विवाह कर लिया व उसे अपनी प्रियतमा बना लिया। सो ठीक है—जो प्राणी कामदेवके पाँच बाणोंसे विद्ध हुआ है वह भला क्या नहीं करता है? अर्थात् वह किसी भी स्त्रीको स्वीकार किया करता है ॥१०१॥

इस प्रकार आचार्य अमितगति विरचित धर्मपरीक्षामें चौदहवाँ
परिच्छेद समाप्त हुआ ॥१४॥

१०१) अ तस्य for तत्र; अ क सतां for महा; अ विगाह्य for विवाह्य ।

अथ चन्द्रमती कन्या कथं जाते ऽपि देहजे ।
कथं न जायते माता मदीया मयि कथ्यताम् ॥१

इत्थं निरुत्तरी[illegible]त्य वैदिकानेष खेचरः ।
विमुच्य तापसाकारं गत्वा काननमभ्यधात्[2] ॥२

अहो लोकपुराणानि विरुद्धानि परस्परम् ।
न विचा[illegible]यते को ऽपि मित्र मिथ्यात्वमोहितः ॥३

अपत्यं जायते स्त्रीणां पनसालि[illegible]न कुतः ।
म[illegible]ष्यस्पर्शतो वल्ल्यो न फलन्ति कदाचन ॥४

अन्तर्वत्नी कथं नारी ना[illegible]स्पर्शेन जायते ।
गोसंगेन न गौर्दृष्टा क्वापि गर्भवती मया ॥५

२) १. ब्राह्मणान् । २. अब्रूत; क अवोचन् ।
३) १. क हे मित्र ।
४) १. क पुत्रम् ।
५) १. गर्भवती ।

इस प्रकार चन्द्रमतीके उपर्युक्त वृत्तान्तको कहकर मनोवेगने कहा कि हे विप्रो! चन्द्रमतीके पुत्रके उत्पन्न हो जानेपर भी जैसे वह कन्या रह सकती है वैसे मेरे उत्पन्न होनेपर मेरी माता क्यों नहीं कन्या रह सकती है, यह मुझे कहिए ॥१॥

इस प्रकारसे वह मनोवेग विद्याधर उन वेदके ज्ञाता ब्राह्मण विद्वानोंको निरुत्तर करके तापस वेषको छोड़ते हुए उद्यानमें जा पहुँचा और मित्र पवनवेगसे बोला ॥२॥

हे मित्र! आश्चर्य है कि लोकमें प्रसिद्ध वे पुराण परस्पर विरोधसे संयुक्त हैं। फिर भी मिथ्यात्वसे मोहित होनेके कारण कोई भी वैसा विचार नहीं करता है ॥३॥

स्त्रियोंके पनस वृक्षका आलिंगन करनेसे भला सन्तान कैसे उत्पन्न हो सकती है? नहीं हो सकती है। क्या कभी मनुष्यके स्पर्शसे बेलें फल दे सकती हैं? कभी नहीं—जिस प्रकार मनुष्यके स्पर्शसे कभी बेलें फल नहीं दिया करती हैं उसी प्रकार वृक्षके स्पर्शसे स्त्री भी कभी सन्तानको उत्पन्न नहीं कर सकती है ॥४॥

स्त्री अन्य स्त्रीके स्पर्शसे गर्भवती कैसे हो सकती है? नहीं हो सकती। कारण कि मैंने कभी एक गायको दूसरी गायके स्पर्शसे गर्भवती होती हुई नहीं देखा है ॥५॥

१) अ जाते ऽपि दोहदे । २) ब मभ्यगात् ।

मण्डूकी मानुषं सूते केनेदं प्रतिपद्यते।
न शालितो मया दृष्टा जायमाना हि कोद्रवाः ॥६

शुक्रभक्षणमात्रेण यद्यपत्यं प्रजायते।
किं कृत्यं धवसंगेन[1] तदापत्याय योषिताम् ॥७

रेतः[1]स्पर्शनमात्रेण जायन्ते यदि सूनवः।
बीजसंगममात्रेण दत्ते सस्यं[2] तदा धरा ॥८

आघ्राते कमले गर्भः शुक्राक्ते यदि जायते।
भक्तमिश्रे तदा पात्रे तृप्तिः केन निवार्यते ॥९

कथं विज्ञाय मण्डूकी कन्यां धत्ते ऽब्जिनीदले।
भेकानामीदृशं ज्ञानं कदा केनोपलभ्यते[1] ॥१०

७) १. पुरुषसंगेन।
८) १. शुक्र। २. अन्नम्।
१०) १. मन्यते प्राप्यते।

मेंढकी मनुष्य स्त्रीको उत्पन्न करती है, इसे भला कौन विचारशील स्वीकार कर सकता है? कोई नहीं। कारण कि मैंने कभी शालि धानसे कोदों उत्पन्न होते हुए नहीं देखे ॥६॥

यदि वीर्यके भक्षणमात्रसे सन्तान उत्पन्न हो सकती है तो फिर सन्तानोत्पत्तिके लिए स्त्रियोंको पुरुषके संयोगकी आवश्यकता ही क्या रह जाती है? वह व्यर्थ सिद्ध होता है ॥७॥

यदि वीर्यके स्पर्शमात्रसे ही पुत्र उत्पन्न हो जाते हैं तो फिर पृथिवी बीजके संसर्ग-मात्रसे ही धान्यको दे सकती है। सो ऐसा सम्भव नहीं है, किन्तु बीजके आत्मसात् कर लेनेपर ही पृथिवी धान्यको उत्पन्न करती देखी जाती है, न कि उसके स्पर्श मात्रसे ही। यही बात प्रकृतमें जाननी चाहिए ॥८॥

वीर्यसे लिप्त कमलके सूँघनेपर यदि गर्भ होता है तो फिर भोजनसे परिपूर्ण पात्र (थाली आदि) के सूँघनेपर तृप्तिको कौन रोक सकता है? कोई नहीं। जिस प्रकार वीर्ययुक्त कमलके सूँघनेमात्रसे गर्भ हो जाता है उसी प्रकार भोजनयुक्त पात्रके सूँघनेपर भोजन-विषयक तृप्ति होकर भूख शान्त हो जानी चाहिए। परन्तु ऐसा सम्भव नहीं है ॥९॥

मेंढकी कन्याको जान करके उसे कमलके पत्रपर कैसे रख सकती है? नहीं रख सकती है। क्योंकि, मेंढकोंके इस प्रकारके ज्ञानको कब और किसने देखा है? अर्थात् मेंढक जातिमें इस प्रकारका ज्ञान कभी किसीके द्वारा नहीं देखा गया है ॥१०॥

६) ब क ड मानुषीम्। ७) ब यदपत्यम्।

[1]रविधर्मानिलेन्द्राणां तनयाः संगतो ऽभवन् ।
कुन्त्याः सत्या [illegible] च कस्येवं हृदि तिष्ठति ॥११

देवानां यदि नारीभिः संगमो जायते सह ।
देवीभिः सह मर्त्यानां न तदा दृश्यते कथम् ॥१२

सर्वाशुचिमये देहे मानुषे कश्मले कथम् ।
निर्धातुविग्रहा देवा रमन्ते मलवर्जिताः ॥१३

अविचारितरम्याणि परशास्त्राणि कोविदैः ।
यथा यथा विचार्यन्ते विशीर्यन्ते तथा तथा ॥१४

देवास्तपोधना भुक्त्वा कन्याः कुर्वन्ति योषितः ।
महाप्रभावसंपन्ना नेदं श्रद्दधते[1] बुधाः ॥१५

११) १. सूर्यस्य पुत्रः कर्णः, धर्मस्य पुत्रः युधिष्ठिरः ।
१५) १. न मन्यन्ते ।

सती कुन्तीके सूर्य, धर्म, वायु और इन्द्रके संयोगसे पुत्र—क्रमसे कर्ण, युधिष्ठिर, भीम और अर्जुन—हुए। यह वृत्त किस चतुर मनुष्यके हृदयमें स्थान पा सकता है ? तात्पर्य यह कि इसपर कोई भी विचारशील व्यक्ति विश्वास नहीं कर सकता है ॥११॥

इस प्रकारसे यदि मनुष्य स्त्रियोंके साथ देवोंका संयोग हो सकता है तो फिर मनुष्योंका संयोग देवियोंके साथ क्यों नहीं देखा जाता है ? वह भी देखा-सुना जाना चाहिए था ॥१२॥

मनुष्योंका शरीर जब मल-मूत्रादि रूप सब ही अपवित्र वस्तुओंसे परिपूर्ण एवं घृणित है तब उसमें देव—जिनका कि शरीर सात धातुओंसे रहित और जो मलसे रहित हैं—कैसे रम सकते हैं ? कभी नहीं रम सकते हैं। तात्पर्य यह कि अतिशय सुन्दर और मल-मूत्रादिसे रहित शरीरवाले देव अत्यन्त घृणित शरीरको धारण करनेवाली मनुष्य स्त्रियोंसे कभी भी अनुराग नहीं कर सकते हैं ॥१३॥

दूसरोंके—जैनेतर—शास्त्रोंके विषयमें जबतक विचार नहीं किया जाता है तबतक ही वे रमणीय प्रतीत होते हैं। परन्तु जैसे-जैसे विद्वान् उनके विषयमें विचार करते हैं वैसे-वैसे वे जीर्ण-शीर्ण होते जाते हैं—उन्हें वे अनेक दोषोंसे व्याप्त दिखने लगते हैं ॥१४॥

देव और तपस्वी जन स्त्रियोंको भोगकर पीछे उन्हें महान् प्रभावसे सम्पन्न होनेके कारण कन्या कर देते हैं, इसपर कोई भी विश्वास नहीं कर सकता है ॥१५॥

---

११) क तनयः संगतो ऽभवत् । १३) अ मानुष्ये । १४) अ ब अविचारेण रम्याणि । १५) अ ब इ कन्याम् ।

ये पारदारिकीभूय सेवन्ते परयोषितः ।
प्रभावो जायते तेषां विटानां कथ्यतां कथम् ॥१६

किं मित्रासत्प्रलापेन कृतेनानेन वच्मि ते ।
उत्पत्तिं कर्णराजस्य जिनशासनशंसिताम् ॥१७

व्यासस्य भूभृतः पुत्रास्त्रयो जाता गुणालयाः ।
धृतराष्ट्रः परः पाण्डुर्विदुरश्चेति विश्रुताः ॥१८

एकदोपवने पाण्डू रममाणो मनोरमे ।
निरैक्षत लतागेहे खेचरीं काममुद्रिकाम् ॥१९

यावत्तिष्ठति तत्रासौ कृत्वा मुद्रां कराङ्गुलौ ।
आगाच्चित्राङ्गदस्तावत्तस्याः खेटो गवेषकः ॥२०

१६) १. परदारलम्पटाः ।
१७) १. कथिताम् ।
१८) १. राज्ञः ।

जो परस्त्रियोंमें अनुरक्त रहकर उनका सेवन किया करते हैं वे यदि महान् प्रभावशाली हो सकते हैं तो फिर व्यभिचारी जनोंके विषयमें क्या कहा जाये ? वे भी प्रभावशाली हो सकते हैं। अभिप्राय यह है कि अन्य दुराचारी जनोंके समान यदि देव व मुनिजन भी परस्त्रियोंका सेवन करने लग जायें तो फिर उन दुराचारियोंसे उनमें विशेषता ही क्या रहेगी और तब वैसी अवस्थामें वे प्रभावशाली भी कैसे रह सकते हैं ? यह सब असम्भव है ॥१६॥

आगे मनोवेग कहता है कि हे मित्र ! इस प्रकार जो उन पुराणोंमें असत्य कथन पाया जाता है उसके सम्बन्धमें अधिक कहनेसे कुछ लाभ नहीं है। उन पुराणोंमें जिस कर्णकी उत्पत्ति सूर्यके संयोगसे कुन्तीके कही गयी है उसकी उत्पत्ति जैन शास्त्रोंमें किस प्रकार निर्दिष्ट की गयी है, यह मैं तुम्हें बतलाता हूँ ॥१७॥

व्यास राजाके गुणोंके आश्रयभूत धृतराष्ट्र, पाण्डु और विदुर ये प्रसिद्ध तीन पुत्र उत्पन्न हुए थे ॥१८॥

एक समय पाण्डु वनक्रीड़ाके लिए किसी मनोहर उपवनमें गया था। वहाँ क्रीड़ा करते हुए उसने एक लतामण्डपमें किसी विद्याधरकी उस काममुद्रिकाको देखा जो अभीष्ट रूपके धारण करानेमें समर्थ थी ॥१९॥

उसे हाथकी अंगुलीमें डालकर वह अभी वहींपर स्थित था कि इतनेमें उक्त मुद्रिकाको खोजते हुए चित्रांगद नामका विद्याधर वहाँ आ पहुँचा ॥२०॥

१६) अ क ड इ पारदारकीभूय; क ड इ °योषितम्; अ इ कथ्यते । १७) क कृतेन शृणु; अ कर्णिराजस्य ।
१८) अ धृतराष्ट्रो ऽपरः । २०) ब अगाच्चित्रा°; क ड आयाच्चित्रा° ।

तस्य सा पाण्डुना दत्ता निःस्पृहीभूतचेतसा ।
परद्रव्ये महीयांसः[1] सर्वत्रापि पराङ्मुखाः ॥२१
स[1] विलोक्य विलोभत्वं[2] तं[3]ममन्यत बान्धवम् ।
अन्यवित्तपराधीना[4] जायन्ते जगदुत्तमाः ॥२२
तमाचष्ट ततः खेटः साधो त्वं मे हि बान्धवः ।
यो ऽन्यदीयं सदा द्रव्यं कचारमिव पश्यति ॥२३
विषण्णो दृश्यसे किं त्वं बन्धो सूचय कारणम् ।
न गोप्यं क्रियते किंचित् सुहृदो हि पटीयसा ॥२४
अभाषिष्ट ततः पाण्डुः साधो सूर्यपुरे नृपः ।
विद्यते ऽन्धकवृष्ट्याख्यस्त्रिदिवे मघवानिव ॥२५
तस्यास्ति सुन्दरा कन्या कुन्ती मकरकेतुना ।
ऊर्ध्वीकृता पताकेव त्रिलोकजयिना सता ॥२६
सा तेन भूभृता पूर्वं दत्ता मन्मथवर्धिनी ।
इदानीं न पुनर्दत्ते विलोक्य मम रोगिताम् ॥२७

२१) १. महानुभावः ।
२२) १. खेटः । २. क निर्लोभत्वम् । ३. धृतराष्ट्रम् । ४. पराङ्मुखाः ।

तब मनमें उसकी किंचित् भी अभिलाषा न करके पाण्डुने वह मुद्रिका उसे दे दी। सो ठीक है—महान् पुरुष सभी जगह दूसरेके द्रव्यके विषयमें पराङ्मुख रहा करते हैं—वे उसकी कभी भी इच्छा नहीं किया करते हैं ॥२१॥

पाण्डुकी निर्लोभ वृत्तिको देखकर चित्रांगदने उसे अपना हितैषी मित्र समझा। ठीक है—दूसरेके धनसे विमुख रहनेवाले सज्जन लोकमें उत्तम हुआ ही करते हैं ॥२२॥

पश्चात् विद्याधरने उससे कहा कि हे सज्जन! तुम मेरे वह बन्धु हो जो निरन्तर दूसरेके धनको कचराके समान तुच्छ समझा करता है ॥२३॥

फिर वह बोला—हे मित्र! तुम खिन्न क्यों दिखते हो, मुझे इसका कारण बतलाओ। कारण यह कि चतुर मित्र अपने मनोगत भावको मित्रसे नहीं छिपाया करता है ॥२४॥

इसपर पाण्डु बोला कि हे सत्पुरुष! सूर्यपुरमें एक अन्धकवृष्टि नामका राजा है। वह ऐसा प्रभावशाली है जैसा कि स्वर्गमें इन्द्र प्रभावशाली है ॥२५॥

उसके एक सुन्दर आकृतिको धारण करनेवाली—अतिशय रूपवती—कन्या है। वह ऐसी प्रतीत होती है जैसे मानो तीनों लोकोंके जीत लेनेपर कामदेवने अपने विजयकी पताका ही ऊपर खड़ी कर दी हो—फहरा दी हो ॥२६॥

कामको वृद्धिंगत करनेवाली उस कन्याको पहले अन्धकवृष्टि राजाने मुझे दे दिया था। किन्तु अब इस समय वह मेरी रुग्णावस्थाको देखकर उसे मुझे नहीं दे रहा है ॥२७॥

२२) अ ड जगत्युत्तमाः, ब जगतो मताः । २३) क ड इ तमाचष्टे; क ड त्वमेव; अ ब स for हि । २४) ब सुहृदा; क पटीयसः । २६) अ सुन्दराकारा कन्या मकर°....त्रिलोकं जयता । २७) ब मन्मथवर्तिनी; इ रोगताम् ।

अनेन हेतुना बन्धो विषादो मानसे ऽजनि ।
कुठार इव काष्ठानां मर्मणां मम कर्तकः ॥२८

चित्राङ्गदस्ततो ऽवोचत् साधो मुञ्च विषण्णताम् ।
नाशयामि तवोद्वेगं कुरुष्व मम भाषितम् ॥२९

गृहाण त्वमिमां मित्र मदीयां काममुद्रिकाम् ।
कामरूपधरो भूत्वा तां भजस्व मनःप्रियाम् ॥३०

पश्चाद् गर्भवतीं जातां स ते दास्यति तां स्वयम् ।
न दूषितां स्त्रियं सन्तो वासयन्ति निजे गृहे ॥३१

सो ऽगात्तस्यास्ततो गेहं गृहीत्वा काममुद्रिकाम् ।
स्वयं हि विषये लोलो लब्धोपायो न किं जनः ॥३२

स्वेच्छया स सिषेवे तां[1] कामाकारधरो रहः ।
मनःप्रियां प्रियां प्राप्य स्वेच्छा हि क्रियते न कैः ॥३३

३३) १. नारीम् ।

इसी कारण हे मित्र ! मेरे मनमें लकड़ियोंको काटनेवाले कुठारके समान मर्मोंको काटनेवाला यह खेद उत्पन्न हुआ है ॥२८॥

उसके इस विषादकारणको सुनकर चित्रांगद बोला कि हे भद्र ! तुम इस विषादको छोड़ दो। मैं तुम्हारी उद्‌विग्नताको नष्ट कर देता हूँ। तुम जो मैं कहता हूँ उसे करो ॥२९॥

हे मित्र ! तुम मेरी इस कामवुद्रिकाको लेकर जाओ और इच्छानुसार रूपको धारण करके अपने मनको प्यारी उस कन्याका उपभोग करो ॥३०॥

तत्पश्चात् जब उसके गर्भाधान हो जायेगा तब वह उसे स्वयं ही तुम्हारे लिए प्रदान कर देगा, क्योंकि, सत्पुरुष दूषित स्त्रीको अपने घरमें नहीं रहने दिया करते हैं ॥३१॥

तदनुसार पाण्डु उस काममुद्रिकाको लेकर उक्त कन्याके निवासगृहमें जा पहुँचा। सो ठीक है—मनुष्य विषयका लोलुपी स्वयं रहता है, फिर जब तदनुकूल उपाय भी मिल जाता है तब वह क्या उसका लोलुपी नहीं रहेगा ? तब तो वह अधिक लोलुपी होगा ही ॥३२॥

इस प्रकार वहाँ पहुँचकर उसने इच्छानुसार कामदेवके समान आकारको धारण करते हुए उसका स्वेच्छापूर्वक उपभोग किया। ठीक है—मनको प्रसन्न करनेवाली उस प्रियाको एकान्तमें पाकर कौन अपनी इच्छाको चरितार्थ नहीं किया करते हैं ? अर्थात् वैसी अवस्थामें सब ही जन अपनी अभीष्ट प्रियाका उपभोग किया ही करते हैं ॥३३॥

---

३१) ब स्वयं for स्त्रियम् । ३२) क ड इ लब्धोपायेन । ३३) अ °कारकरोरहः, ब कामाकामकरो रहः, क °कारमनोहरः; ड स्वेच्छया क्रियते न किम् ।

तेन तां[1] सेवमानेन कुमारीं दिनसप्तकम् ।
यूना[2] निरोपितो गर्भः कोशो[3] नीतिमिवानघाम् ।।३४

अयासीन्निर्वृतो[1] भूत्वा हित्वा[2] तत्रैव तामसौ ।
सिद्धे मनीषिते कृत्ये निर्वृतिं लभते न कः ।।३५

ज्ञात्वा गर्भवती मात्रा निभृतं[1] सा प्रसाविता[2] ।
गुह्यं छादयते सर्वो गृहदूषणभीलुकः ।।३६

मञ्जूषायां विनिक्षिप्य देवनद्यां प्रवाहितः ।
तदीयस्तनयो मात्रा गृहदूषणभीतया ।।३७

गङ्गया नीयमानां तामादित्यो जगृहे नृपः ।
संपत्तिमिव दुर्नीत्या दृष्ट्वा चम्पापुरीपतिः ।।३८

तस्या मध्ये ददर्शासौ बालं पावनलक्षणम् ।
सरस्वत्या इवानिन्द्यमर्थं विद्वज्जनार्चितम् ।।३९

३४) १. कुन्तीम् । २. यौवनेन पाण्डुना । ३. भंडारः ।
३५) १. सुखी । २. मुक्त्वा; क त्यक्त्वा ।
३६) १. प्रच्छन्नम् । २. क गुह्यस्थानं प्रति रक्षिता सती पुत्रमसूत ।

इस प्रकार उस तरुण पाण्डुने सात दिन तक उसका सम्भोग करते हुए गर्भको इस प्रकारसे स्थापित कर दिया जिस प्रकार कि खजाना निर्दोष नीतिको स्थापित करता है ।।३४।।

तत्पश्चात् उसने सुखी होकर उसको वहींपर छोड़ा और स्वयं वापस आ गया । सो ठीक है--अभीष्ट कार्यके सिद्ध हो जानेपर भला कौन सुखको नहीं प्राप्त होता है ? अर्थात् समीहितके सिद्ध हो जानेपर सब ही जन सुखका अनुभव किया करते हैं ।।३५।।

इधर कुन्ती की माताको जब यह ज्ञात हुआ कि वह गर्भवती है तब उसने अत्यन्त गुप्तरूपसे प्रसूति करायी । सो ठीक है—घरके कलंकसे भयभीत होकर सब ही जन गोपनीय बातको छिपाया करते हैं ।।३६।।

उस समय कुन्तीकी माताने इस गृह-कलंकसे भयभीत होकर उसके पुत्रको एक पेटीमें रखा और गंगा नदीमें प्रवाहित कर दिया ।।३७।।

इस प्रकार गंगाके द्वारा ले जायी गयी उस पेटीको देखकर चम्पापुरके अधिपति आदित्य राजाने उसे दूषित नीतिसे लायी गई सम्पत्तिके समान ग्रहण कर लिया ।।३८।।

तब उसने उस पेटीके भीतर विद्वान् जनोंसे पूजित सरस्वतीके मध्यगत निर्दोष अर्थके समान उत्तम लक्षणोंसे परिपूर्ण एक बालकको देखा ।।३९।।

३४) अ तेनैताम्; ब क ड प्ररोपितो for निरोपितो । ३५) अ ब क आयासीत्; अ निवृत्तिम् । ३६) अ ब गर्भवतीम् । ३८) अ गङ्गायाः ।

कर्णे ऽग्राहि यतो राजा बालेन मुखदर्शने।
आजुहाव[1] महाप्रीत्या ततस्तं कर्णसंज्ञया ॥४०

अवीवृधदसौ[1] बालमपुत्रः पुत्रकाङ्क्षया।
अद्रव्यो द्रव्यलाभेन द्रव्यराशिमिवोर्जितम् ॥४१

चम्पायां सो ऽभवद्राजा तत्रातीते[1] महोदये।
आदित्ये भुवनानन्दी व्योमनीव निशाकरः ॥४२

आदित्येन यतो ऽवर्धि भूभृतादित्यजस्ततः।
ज्योतिष्केण पुनर्जातो नादित्येन महात्मना ॥४३

निर्धातुकेन देवेन न नार्यां जन्यते नरः।
पाषाणेन कदा[1] धात्र्यां[2] जन्यन्ते सस्यजातयः ॥४४

४०) १. आकारयामास।
४१) १. आदित्यः।
४२) १. तस्मिन् आदित्ये मृते सति ।
४४) १. तर्हि। २. क पृथिव्याम् ।

उस समय उस बालकने अपने मुखको देखते समय चूँकि राजाको कानमें ग्रहण किया था अतएव उसने उक्त बालकको 'कर्ण' इस नामसे बुलाया—उसका उसने 'कर्ण' यह नाम रख दिया ॥४०॥

उसके कोई पुत्र न था। इसलिए उसने उसे पुत्रकी इच्छासे इस प्रकार वृद्धिंगत किया जिस प्रकार कि कोई निर्धन मनुष्य धनकी इच्छासे उस धनकी राशिको वृद्धिंगत करता है ॥४१॥

जिस प्रकार महोदय—अतिशय उन्नत (तेजस्वी)—सूर्यके अस्त हो जानेपर आकाशमें उदित होकर चन्द्रमा लोकको आनन्दित करता है उसी प्रकार उस महोदय—अतिशय उन्नत (प्रतापी)—आदित्य राजाके अस्तंगत हो जानेपर (मृत्युको प्राप्त) वह कर्ण राजा होकर लोकको आनन्दित करनेवाला हुआ ॥४२॥

महा मनस्वी उस कर्णको चूँकि आदित्य राजाने वृद्धिंगत किया था, इसीलिये वह आदित्यज—सूर्यपुत्र—कहा जाता है; न कि आदित्य (सूर्य) नामके ज्योतिषी देवसे उत्पन्न होनेके कारण ॥४३॥

कारण यह कि धातु (वीर्य आदि) से रहित कोई भी देव मनुष्यस्त्रीसे मनुष्यको उत्पन्न नहीं कर सकता है। और वह ठीक भी है, क्योंकि, पत्थरके द्वारा भूमिमें गेहूँ आदि अनाज कभी भी उत्पन्न नहीं किये जाते हैं। अभिप्राय यह है कि समानजातीय पुरुष प्राणी समानजातीय स्त्रीसे समानजातीय सन्तानको ही उत्पन्न कर सकता है, न कि विपरीत दशामें ॥४४॥

४१) अ क इ द्रव्यलोभेन। ४२) क तत्रातीव; अ भवनां॰। ४३) इ ज्योतिषेण; अ ड इ महामनाः। ४४) क ड तदा धात्र्याम्।

वितीर्णा पाण्डवे[1] कुन्ती विज्ञायान्धकवृष्णिना[2] ।
गान्धारी धृतराष्ट्राय[3] दोषं प्रच्छाद्य धीमता ॥४५

इत्यन्यथा पुराणार्थो व्यासेन कथितोऽन्यथा ।
रागद्वेषग्रहग्रस्ता न हि बिभ्यति पापतः ॥४६

युक्तितो घटते यन्न तद् ब्रुवन्ति न धार्मिकाः ।
युक्तिहीनानि वाक्यानि भाषन्ते पापिनः परम् ॥४७

संबन्धा भुवि दृश्यन्ते सर्वे सर्वस्य भूरिशः ।
भर्तॄणां क्वापि पञ्चानां नैकया भार्यया पुनः ॥४८

सर्वे सर्वेषु कुर्वन्ति संविभागं महाधियः ।
महेलासंविभागस्तु निन्द्यानामपि निन्दितः ॥४९

व्यासो योजनगन्धाया यः पुत्रः स परो मतः ।
धन्याया राजकन्यायाः सत्यवत्याः पुनः प्रियः ॥५०

---

४५) १. पाण्डु । २. कुन्तीस्वरूपं ज्ञात्वा । ३. दत्ता ।

कुन्तीके उपर्युक्त वृत्तको जानकर उसे बुद्धिमान् अन्धकवृष्टि राजाने उस दोषको छिपाते हुए पाण्डुके लिये प्रदान कर दिया—उसके साथ उसका विवाह कर दिया । साथ ही उसने गान्धारीको धृतराष्ट्रके लिए भी प्रदान कर दिया ॥४५॥

इस प्रकार पुराणका वृत्तान्त तो अन्य प्रकार है, परन्तु व्यास ऋषिने उसका निरूपण अन्य प्रकारसे—विपरीत रूपसे—किया है । ठीक है—जो जन राग व द्वेषरूप पिशाचसे पीड़ित होते हैं वे पापसे नहीं डरा करते हैं ॥४६॥

जो वृत्त युक्तिसे संगत नहीं होता है उसका कथन धर्मात्मा जन नहीं किया करते हैं । युक्तिसे असंगत वाक्योंका उच्चारण तो केवल पापी जन ही किया करते हैं ॥४७॥

लोकमें सबके सब सम्बन्ध बहुत प्रकारके देखे जाते हैं, परन्तु एक ही स्त्रीसे पाँच भाइयोंका सम्बन्ध कहींपर भी नहीं देखा जाता है ॥४८॥

इसी प्रकार सब ही बुद्धिमान् सबके साथ द्रव्यादिका विभाजन किया करते हैं, परन्तु स्त्रीका विभाजन तो नीच जनोंके द्वारा भी निन्दनीय माना जाता है ॥४९॥

जो व्यास योजनगन्धाका पुत्र था वह भिन्न माना गया है और प्रशंसनीय सत्यवती नामकी राजकन्याका पुत्र व्यास भिन्न माना गया है ॥५०॥

---

४५) अ °न्धकवह्निना । ४६) क इ बिभ्यन्ति । ४७) ब कथं for परम् । ४८) क ड इ भुवि विद्यन्ते । ब सर्वे सर्वेण; अ इ महिला° । ५०) ब क ड इ पुनः परः ।

परः पाराशरो राजा तापसो ऽसौ पुनः परः ।
एकतां कुर्वते लोकास्तयोर्नामविमोहिताः ॥५१
दुर्योधनादयः पुत्रा गान्धार्या धृतराष्ट्रजाः ।
कुन्तीमद्र्योः सुताः पञ्च पाण्डवाः प्रथिता[1] भुवि ॥५२
गान्धारीतनयाः सर्वे कर्णेन सहिता नृपम् ।
जरासंधं निषेवन्ते पाण्डवाः केशवं पुनः ॥५३
जरासंधं रणे हत्वा वासुदेवो महाबलः ।
बभूव धरणीपृष्ठे समस्ते धरणीपतिः ॥५४
कुन्तीशरीरजाः कृत्वा तपो जग्मुः शिवास्पदम् ।
माद्रीशरीरजौ भव्यौ सर्वार्थसिद्धिमीयतुः ॥५५
दुर्योधनादयः सर्वे निषेव्य जिनशासनम् ।
आत्मकर्मानुसारेण प्रययुस्त्रिदिवास्पदम् ॥५६
ईदृशो ऽयं पुराणार्थो व्यासेन परथाकथि ।
मिथ्यात्वाकुलचित्तानां तथ्या[1] भाषा कुतस्तनी ॥५७

५२) १. विख्याताः ।
५७) १. सत्या ।

इसी प्रकार पूर्व व्यासका पिता वह पारासर तापस और उत्तर व्यासका पिता पारासर राजा ये दोनों भी भिन्न हैं। लोग दोनोंका एक ही नाम होनेसे अज्ञानतावश उन्हें अभिन्न मानते हैं ॥५१॥

धृतराष्ट्रके संयोगसे उत्पन्न हुए दुर्योधन आदि पुत्र गान्धारीके तथा पृथ्वीपर प्रसिद्ध पाँच पाण्डव (पाण्डुपुत्र) कुन्ती व मद्रीके पुत्र थे ॥५२॥

वे सब गान्धारीके पुत्र कर्णके साथ राजा जरासन्धकी सेवा किया करते थे तथा पाँचों पाण्डव कृष्णकी सेवा करते थे ॥५३॥

वसुदेवका पुत्र अतिशय प्रतापशाली कृष्ण युद्धमें जरासन्धको मारकर समस्त पृथिवीका—तीन खण्ड स्वरूप दक्षिणार्ध भरत क्षेत्रका—स्वामी हुआ ॥५४॥

कुन्तीसे उत्पन्न तीन पाण्डव—युधिष्ठिर, भीम और अर्जुन—तपश्चरण करके मुक्तिको तथा मद्रीके भव्य पुत्र—नकुल व सहदेव—सर्वार्थसिद्धिको प्राप्त हुए ॥५५॥

शेष दुर्योधन आदि सब जैन धर्मका आराधन करके अपने-अपने कर्मके अनुसार स्वर्गादिको प्राप्त हुए हैं ॥५६॥

इस प्रकार यह पुराणका यथार्थ वृत्त है, जिसका वर्णन व्यासने विपरीत रूपसे किया है। सो ठीक भी है—जिनका अन्तःकरण मिथ्यात्वसे व्याप्त रहता है, वे यथार्थ कथन कहाँसे कर सकते हैं? नहीं कर सकते ॥५७॥

५१) ब पुरः परासरो; इ आतस्तापसो....कुर्वन्ते । ५३) अ क ड इ जरासिन्धुं; ब निषेवन्तः । ५४) क धरणीतले, ड इ धरणीपीठे । ५५) अ क मद्री° । ५६) अ ब इ °स्त्रिदिवादिकम् । ५७) ब यो for अयम्; क तथा भाषा ।

अप्रसिद्धिकरीं दृष्ट्वा पूर्वापरविरुद्धताम् ।
भारते निर्मिते व्यासः प्रदध्याविति मानसे ॥५८
निरर्थकं कृतं कार्यं यदि लोके प्रसिध्यति[1] ।
असंबद्धं विरुद्धार्थं तदा शास्त्रमपि स्फुटम्[2] ॥५९
स[1] ताम्रभाजनं क्षिप्त्वा जाह्नवीपुलिने[2] ततः ।
तस्योपरि चकारोच्चैर्वालुकापुञ्जमूर्जितम् ॥६०
तदीयं सिकतापुञ्जं विलोक्य सकलैर्जनैः ।
परमार्थमजानानैश्चक्रिरे[1] धर्मकाङ्क्षिभिः ॥६१
यावत्स्नानं विधायासौ वीक्षते ताम्रभाजनम् ।
तावत्तत्पुञ्जसंघाते न स्थानमपि बुध्यते ॥६२
पुलिन[1]व्यापकं दृष्ट्वा वालुकापुञ्जसंचयम् ।
विज्ञाय लोकमूढत्वं स श्लोकमपठीदिमम् ॥६३
दृष्ट्वानुसारिभिर्लोकैः परमार्थाविचारिभिः ।
तथा स्वं हार्यते कार्यं यथा मे ताम्रभाजनम् ॥६४

५८) १. चिन्तयामास ।
५९) १. प्रसिद्धीभवति । २. प्रसिध्यति ।
६०) १. व्यासः । २. क गङ्गातटे ।
६१) १. पुञ्जाः ।
६३) १. तट ।
६४) १. गतानुगतिको लोको न लोकः पारमार्थिकः । पश्य लोकस्य मूर्खत्वं हारितं ताम्रभाजनम् ॥

भारत (महाभारत) की रचना कर चुकनेके पश्चात् उसमें निन्दाके कारणभूत पूर्वापर विरोधको देखकर व्यासने अपने मनमें इस प्रकार विचार किया—यदि विना प्रयोजनके भी किया गया कार्य लोकमें प्रसिद्ध हो सकता है तो असम्बद्ध एवं विरुद्ध अर्थसे परिपूर्ण मेरा शास्त्र—महाभारत—भी स्पष्टतया प्रसिद्ध हो सकता है ॥५८–५९॥

इसी विचारसे व्यासने एक ताँबेके पात्र (कमण्डलु) को गंगाके किनारे रखकर उसके ऊपर बहुत-सी बालुकाके समूहका ढेर कर दिया ॥६०॥

उनके उस बालुकासमूहको देखकर यथार्थ स्वरूपको न जाननेवाले—अन्धश्रद्धालु जनोंने भी धर्म समझकर उसी प्रकारके बालुके ढेर कर दिये ॥६१॥

इस बीच स्नान करनेके पश्चात् जब व्यासने उस ताँबेके बर्तनको देखा तब वहाँ बालुकासमूहके इतने ढेर हो चुके थे कि उनमें उस ताम्रपात्रके स्थानका ही पता नहीं लग रहा था ॥६२॥

समस्त गंगातटको व्याप्त करनेवाले उस बालुका समूहकी राशिको देखकर व लोगोंकी इस अज्ञानताको जानकर व्यासने यह श्लोक पढ़ा—जो लोग दूसरेके द्वारा किये गये कार्यको

६०) ब क इ चकारोच्चं, ड चकारेत्थं; ड इ °पुञ्जसंचयम् । ६३) ब क °पठीदिदम् । ६४) अ दृष्टानुसारि°।

मिथ्याज्ञानतमोव्याप्ते लोके ऽस्मिन्निर्विचारके।
एकः शतसहस्राणां मध्ये यदि विचारकः ॥६५
विप[…]माप मे शास्त्रं यास्यतीदं प्रसिद्धताम्।
इति ध्यात्वा तुतोषासौ दृष्ट्वा लोकविमूढताम् ॥६६
विज्ञायेत्थं पुराणानि लौकिकानि मनीषिभिः[1]।
न कार्याणि प्रमाणानि वचनानीव वैरिणाम् ॥६७
दर्शयामि पुराणं ते मित्रान्यदपि लौकिकम्।
उक्त्वेति परिजग्राह स रक्तपटरूपताम्[1] ॥६८
अपूर्वदर्शनमस्माकं केन दृष्टमिदं भुवि ।
उन्मत्तो वा पिशाचो वा इति तेषां विचारणा ॥

कैश्चिदुक्तम्—अयमीश्वरो मुक्तिं गन्तुमुद्यतो ऽभूदिति । कैश्चिदुक्तम्—यद्येवंविधो मुक्तिं गच्छति नरकं को गच्छेदिति । तथा चोक्तम्—

रज्ज्वा बध्नाति वायुं मृगयति स जले मत्स्यकानां विमार्गं
बन्ध्यस्त्रीषण्डकानामभिलषति सुतं वालुकाभ्यश्च तैलम् ।
दोर्भ्यां गन्तुं पयोधिं झषकुलकलिताङ्गो विषाणे ऽपि दुग्धं
सर्वारम्भप्रवृत्तो नरपशुरिह यो मोक्षमिच्छेत् सुखानि ॥

कैश्चिदुक्तम्—शिवो ऽयं कृतकृत्य इति । कैश्चिदुक्तम्—यद्येवं शिवः तर्हि शैवसिद्धान्तस्य विरोधो भवति । सिद्धान्तः कः ।

पाताले चान्तरिक्षे दश दिशि भवने सर्वशैले समुद्रे
काष्ठे लोष्टेष्टिकाभस्मसु जलपवने स्थावरे जङ्गमे वा ।
बीजे सर्वौषधीनामसुरसुरपुरे पत्रपुष्पे तृणाग्रे
सर्वव्यापी शिवो ऽयं त्रिभुवनभवने नास्ति चेदन्य एव ॥ इत्यादि ।

सर्वव्यापिनो गमनागमनसंभवश्चेत्यादिविकल्पानुत्पादयन् हिमवद्गिरिसमीपं गतः । तद्गिरेर्या पूर्वं मृता सती गौरी नाम्नी पुत्री बभूव । पर्वतस्य कथं दुहितेति चेदाह । पूर्वं सर्वेषां पर्वतानां पक्षाः सन्ति । पक्षिण इव खे चरन्तः एकदा अमरावतीं गताः । तत्र चेन्द्रवनं भक्षित्वा रोमन्थं वर्तयन्तः स्थिताः । इन्द्रेण दृष्ट्वा कोपेन वज्रायुधेनाहत्य पातिताः । हिमवद्गिरिर्मेना नाम स्त्रीगिरेरुपरि पतितः । तदेवावसरे तस्याः जीवो मध्ये ऽभूत् । तयोः संघट्टनेन पुत्री बभूवेति । स्फुलिङ्गमध्ये उत्पन्नेति तस्याः कामाग्नेः उपशान्तिर्नास्तीति तेन दृष्ट्वा च याचिता च प्राप्य विवाहिता । तया सह कैलासे तिष्ठन् एकस्मिन् दिने बहिर्गत्वागत्य द्वारे स्थित्वा प्रिये द्वारमुद्घाटयेत्युक्ते तयोक्तं वक्रोक्त्या ।

को ऽयं द्वाराग्रतो ऽस्थाद्वदति पशुपतिः किं वृषो नो ऽर्धनारी,
किं पिण्डो नैव शूली किमपि च सरुजो न प्रिये नीलकण्ठः ।
ब्रूहि त्वं किं मयूरो न हि विदितशिवः किं पुराणः शृगालः
इत्येवं हैमवत्या चतुरनिगदितः शंकरः पातु युष्मान् ॥

इति कैलासे गौरीसमेतः शंकरस्तिष्ठति । प्रतिदिनं गङ्गायां स्नानार्थं गच्छति । एकस्मिन् दिने गङ्गाकुमारीं सुरूपां दृष्ट्वा विशिष्टरूपेण तन्निकटं गत्वोक्तवान् का त्वमिति । तयोक्तम्—गङ्गा । तेनोदितम्—को भर्ता । तयोक्तम्—यो ऽद्वितीयः स मे भर्ता । न तादृशः को ऽप्यस्ति । स बभाण—अहमेव तथा । इति भणित्वा परिणीता । तया सह कामक्रीडां करोति । शिवाभीत्या तां तत्रैव निधाय कैलासं गतः । साप्यवलोकयन्ती तत्रागता । तया गौर्या सह सारैः क्रीडन्नीश्वरो दृष्टः । तां दृष्ट्वा गौर्योक्तम्—

का त्वं सुन्दरि जाह्नवी किमिह ते भर्ता हरो नन्वयम्
अम्भस्त्वं किल वेत्सि मन्मथरसं जानात्ययं त्वत्पतिः ।
स्वामिन् सत्यमिदं न हि प्रियतमे सत्यं कुतः कामिनी-
मित्येवं हरजाह्नवीगिरिसुतासंजल्पनं पातु वः ॥

तदनु गौरी रुष्टा। गाहा।

ता गउरी तोसविया पाए पडिऊण परमदेवेण।
सो तुम्हं देउ सिवं परमप्पो विग्घविलयेण॥

तदनु गौर्या चिन्त्यते—

सन्ध्या रागवती स्वभावचपला गङ्गा द्विजिह्वः फणी
चन्द्रो लाञ्छनवक्त्र एव मलिनो जात्यैव मूर्खो वृषः।
कष्टं दुर्जनसंकटे पतिगृहे वस्तव्यमेतत्कथं
देवी व्यस्तकपोलपाणितलका चिन्तान्विता पातु वः॥

तदनु शंकरेण गङ्गा मस्तके ऽर्धाङ्गे गौरी धृता। ततो ऽतीव संतुष्टा। तदुक्तम्—

अलिनीलालकमुग्रभासुरजटं लोलाक्षमुग्रेक्षणं
तिलकार्धं नयनार्धमुन्नतकुचं रम्योरुवक्षःस्थलम्।
खट्वाङ्गं फणिकङ्कणं सुवसनं व्याघ्राजिनं लीलया
शान्तं भीषणमर्धनारिघटितं रूपं शिवं पातु वः॥

इति अदत्तां स्वीकुरुते यो गंगा दत्तां छायां त्यजतीति। पुनस्तयोक्तम्—तर्हि ब्रह्मणः पार्श्वे स्थाप्यते। तेनोक्तम्—नोचितम्। किमिति। किं त्वया पुष्करब्रह्माण्डजपुराणानि न श्रुतानि। तर्हि निरूप्यते मया।

महेश्वरस्य गौर्या विवाहकाले ब्रह्मा पुरोहितो ऽभूत्। अग्निकुण्डप्रदक्षिणीकरणकाले गौर्याः जङ्घाप्रदेशं दृष्ट्वा ब्रह्मणः शुक्रक्षरणे जाते कियत् कलशमध्ये पतितम्। तत्र द्रोणाचार्योऽभूत्। वृषभपादगर्तस्थितोदके कियत् पतितम्। तत्र वालखिल्यादयः सप्तकोटिऋषयो जाताः। तदनु लज्जया गच्छतः कियद् वल्मीकस्योपरि पतितम्। तत्र वाल्मीकिनामा ऋषिरुत्पन्नः। तदन्वग्रे गच्छतः भस्मनि कियत्पतितम्। तत्र भूरिश्रवा जातः। ततो ऽग्रे गच्छतो ऽस्थ्नि कियत्पतितम्। तत्र शल्यो जातः। तदन्वग्रे गच्छतः कियत् स्थले पतितम्। तत्रोर्वशी जाता। तदन्वग्रे लिङ्गं वामकरेण धृत्वा गच्छत उपरि धारा उच्छलिताः। तत्र शक्तिना कियद्‌गिलितः [तम्]। तत्र शक्तिनामा क्षत्रियो जातः। ततो गच्छन्नेकस्मिन् प्रदेशे लिङ्गं धृत्वा तथापि शुक्रं तिष्ठति नो चेति कम्पितवान्। तत्र कियत् पतितम्। तत्र पद्मा नाम कन्या जाता। सुरूपां तां दृष्ट्वा गृहीत्वा स्वावासं गतः। कालेन सयौवनामभिवीक्ष्यासक्तः सन् भणति। हे पुत्रि मामिच्छ। तयोक्तम्—त्वं पिता। किमेवमुचितम्। तयोक्तम्—किं त्वया वेदो न श्रुतः। न। तर्हि शृणु। मातरमुपैति स्वसारमुपैति पुत्रार्थी, न च कामार्थी। तथापरमपि—नापुत्रस्य लोको ऽस्ति तत्सर्वं पशवो विदुः। तस्मात् पुत्रार्थं मातरं स्वसारं वाधिरोहति। संतानवृद्ध्यर्थं त्वयाभ्युपगन्तव्यम्। इत्यादिवचनालापेन स्ववशीकृता। तदनु तव चित्ते मम चित्तं संदधामि, तव हृदये मम हृदयं संदधामि, तवास्थिषु ममास्थीनि संदधामि, तव प्राणे मम प्राणमिति स्वाहा। त्र्यम्बक मन्त्रः। इमं मन्त्रमुच्चार्य सेवितुं लग्नः यावद्दिव्यषण्मासान् तदनु सर्वैर्देवैर्ज्ञात्वा भणितम्—निकृष्टो ब्रह्मा पुत्रीं कामयते। अत्र पर्यालोच्य तैर्गन्धर्वदेवाः प्रेषिताः ब्रह्मणः संयोगं विनाशाय ते इति [विनाशयतेति]। तैरागत्य सुरतगृहनिकटे चिन्तितम्। कथम्। यदि सहसास्यान्तरायो विधीयते तदा कुपितः सन् अनर्थं करिष्यति। इति पर्यालोच्य तैर्गीतम्। कथम्।

ॐ भूर्भुवःस्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयादिति ।

अतश्चास्या गायत्री नाम जातम् । तच्छ्रुत्वा लज्जितः प्रजापतिः । ततो निर्गच्छन् तस्या गर्भ ऽण्डमुत्पन्नं ज्ञात्वास्य श्लोकस्यार्थं च स्मृत्वा, को ऽसौ श्लोकः ।

पुस्तकप्रत्ययाधीतं नाधीतं गुरुसंनिधौ ।
न शोभन्ते सभामध्ये जारगर्भा इव स्त्रियः ॥

इति लोकापवादभयेन तच्च लिङ्गाग्रेणाकृष्यान्तर्मुष्कप्रदेशे स्थापितम् । ततो वातवृषाणो जातः । स एकदा भ्रमन्निन्द्रपुरीं दृष्टवान् । तत्र रम्भाप्रभृतीर्दृष्ट्वा कामाग्नितप्तचित्तः युद्धे इन्द्रपदवीं ग्रहीतुं न शक्यते । प्रार्थने किं कलत्रदानमस्ति, वृथावचनं भविष्यतीति तपसा सर्वं साध्यं भवति । तथा चोक्तम्—

यद्दूरं यद्दुराराध्यं यच्च दूरे व्यवस्थितम् ।
तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥

इति पर्यालोच्य इन्द्रपदव्यर्थं सार्धं दिव्यवर्षसहस्रत्रयं तपः कर्तुं लग्नो ब्रह्मा । तं ज्ञात्वा सचिन्तः शचीपतिर्बृहस्पतिना भणितः । किमिति सचिन्तः । तेन सर्वस्मिन् कथिते बृहस्पतिर्बभाण—

तावत्तपो वपुषि चेतसि तत्त्वचिन्ता कामं हृषीकविजयः परमः शमश्च ।
यावन्न पश्यति मुखं मृगलोचनानां शृङ्गारवृत्तिभिरुदाहृतकामसूत्रम् ॥

इति तत्र तत्तपोविनाशाय वनिता प्रस्थापनीया । तद्वचनेनेन्द्रेण स्वदेवीनां रम्यप्रदेशं तिलप्रमाणं गृहीत्वा तिलोत्तमानाम्नी वनिता कृता । प्रेषिता च तत्र तया गत्वा नृत्ये क्रियमाणे स उद्घाटितदृष्टिः त्यक्ताक्षमालिको भूत्वा द्रष्टुं लग्नः । तं ज्ञात्वा तया दक्षिणस्यां दिशि नृत्ये कृते, यदि तन्मुखो भूत्वावलोकयामि तर्हि सर्वैर्हास्य इति मत्वा दिव्यवर्षसहस्रतपश्चरणफलेन अपरं मुखं कृत्वावलोकितवान् । तथा पश्चिमोत्तरयोरपि । उपरि नर्तने सति पञ्चशतवर्षतपःफलेन गर्दभशिरो निर्गतम् । तच्च गगनतलं व्याप्नुवत् सुरविद्याधरादीन् गिलितुं लग्नम् । तदिन्द्रादिदेवोपरोधेन हरेण नखैश्छिन्नम् ।

तस्य भिन्ना कथा । एकस्मिन् ग्रामे गङ्गामार्गे धवलवत्सः अवशोषितस्तेन तद्ब्राह्मणी हता । ब्रह्महत्यातः कृष्णो जातः । ततो भणितम्—तव स्वामिनीहत्यया पापं जातम् । तत्परिहारार्थं प्रातर्गङ्गां गच्छेति श्रुत्वा चलितः । महादेवेनाकर्ण्य भणितम् । तथा करिष्यामि पापपरिहारार्थम् । एवं पञ्चमहापातकानि तत्प्रसादाद् गतम् [गतानि] ततः प्रभृति वृषभवाहनः । सा स्वर्गं गता । स संधुक्षितकामाग्निकः तामपश्यन् अच्छभल्लीमनुभुक्तवान् । तया तच्छरीरं नखैर्विदारितम् । तत्प्रभृति मनुजाः तथा प्रवर्तितुं लग्नाः । तस्या जाम्बूनदो नाम पुत्रो जातः । ततो देवैर्हसितो लज्जितः सन् भ्रमितुं लग्नः ।

एकदामरावतीबाह्ये उर्वशीं नाम वेश्यां दृष्ट्वा स्ववचनकौशलेन स्वानुरक्तां कृत्वा तया सह क्रीडासमये तदण्डं स्वलिङ्गाग्रेणाकृष्य तद्गर्भे निक्षिप्तम् । सा च वसिष्ठं नाम पुत्रं प्रसूता । ब्रह्मा स्वपदवीं तस्मै दत्त्वा तपोऽर्थी गतः । इतः सर्वशास्त्रकुशलेन वसिष्ठेनैकदा द्विजेभ्यो नमस्कारश्चक्रे । न च तैः प्रत्यभिवादितः । तेनोक्तम्—किमिति न प्रत्यभिवादितोऽहम् । तैरुक्तम्—एवंविधो ऽसीति । ततो ऽसौ लज्जया वेद पर्वते तपः कर्तुं लग्नः । वृद्धो भूत्वा इदानीं मम तपोविघ्नं नास्तीति भ्रमितुं लग्नः । एकदा एकस्मिन् ग्रामे अक्षमालिकानाम्नीं चाण्डालीं दृष्ट्वा

निजवचनालापेन स्ववशीकृत्वा क्रीडितवान्। तयोरपत्यं शक्तिर्जातः। सो ऽपि तथा तपः कर्तुं लग्नः। वृद्धत्वे तथा च भ्रमितुं लग्नः। गौतमग्रामे श्वपाकीं दृष्ट्वा तदासक्तचित्तेन हस्तेन धृता। तयोक्तम्—किमिति। तेनोक्तम्—मामिच्छ। पुनस्तयोक्तम्—अनामिकाहम्। पुनस्तेनोक्तम्-तथापि न दोषः। वेदे प्रतिपादितत्वात्। कथम्।

अजाश्वा मुखतो मेध्या गावो मेध्याश्च पृष्ठतः।
ब्राह्मणाः पादतो मेध्याः स्त्रियो मेध्यास्तु सर्वतः ॥

अपरं च।

कामं पुण्यवशाज्जाता कामिनी पुण्यप्रेरिता।
सेव्या सेव्या न संकल्पा स्त्रीरत्नं दुष्कुलादपि ॥

इत्यादिवचनेन स्वाधीना कृता। तयोरपत्यं पाराशरो जातः। स च वन्ध्यगिरौ तपः कर्तुं लग्नः। अन्यदा गङ्गातरणसमये मत्स्यगन्धां सेवितवान्। तयोरपत्यं व्यासो ऽभूत्। तेन मत्स्यगन्धिनीभ्रातुः पुत्र्यः अम्बा अम्बाला अम्बिकाः परिणीताः। तासां पुत्रा धृतराष्ट्रपाण्डु-विदुरा बभूवुः। इति पुष्करब्रह्माण्डज-पुराणानि। एवम् अच्छभल्लीं पुनः स्वपुत्रीं यो गृह्णाति स किं छायां त्यजति। पुनरभाणि तापसपत्न्या—एवं तर्हि विष्णोर्निकटं ध्रियते। तेनोक्तम्—प्रिये, नोचितम्। किमिति। स तद्वृत्तान्तमाह।

द्वारवत्यां षोडशसहस्रगोपिकाभिः सह विष्णुः सुखेन तिष्ठति। विष्णुनैकदाटव्यां भ्रमता राजिकां नाम गोपिकां दृष्ट्वा तेन वचनेन स्वतन्त्रा कृता। उभयोः संयोगो ऽजनि। संकेताद्रात्रौ तस्या गृहं गत्वाङ्गुल्या कपाटं ताडितवान्। तयोक्तम्—

अङ्गुल्या कः कपाटं प्रहरति कुटिलो माधवः किं वसन्तो
नो चक्री किं कुलालो न हि धरणिधरः किं द्विजिह्वः फणीन्द्रः।
नाहं घोराहिमर्दी किमु स खगपतिर्नो हरिः किं कपीन्द्रः
इत्येवं गोपवध्वां प्रतिवचनजडः पातु वश्चक्रपाणिः ॥

एवंविधो ऽपि यो गृह्णाति गोपिकां स किं छायां त्यजति। पुनस्तयोक्तम्—तर्हि चन्द्रस्य समीपे ध्रियते। तेनोक्तम्—न तत्र। को दोषः। स आह।

सो ऽप्येकदा विश्वामित्रतापसभार्यां दृष्ट्वा विशिष्टमात्मीयं रूपं प्रदर्श्य स्वासक्तां कृत्वा क्रीडासमये भर्तारं बहिरागतं ज्ञात्वा मध्ये कः इत्युक्ते मार्जार इत्युक्ते स मार्जारवेषेण निर्गतः। तपस्विना दृष्ट्वानेनान्यायः कृतः इति मत्वा स मृगचर्ममयाधारेणाहतः कलङ्काङ्कितो ऽभूत्। रोहिणीप्रभृतिदेवाङ्गनानामपि स्वामी तापसीं गृह्णाति। स किं छायां त्यजति। पुनरवादि तया। त[र्हि इ]न्द्रसमीपं ध्रियते। प्रिये, न। किं कारणम्।

तेनैकदा वने परिभ्रमता गौतमर्षिभार्यामहिल्यां दृष्ट्वा सातिशयरूपेण तत्समीपं गत्वा अनुकूलिता च। तया क्रीडन् मुनिना दृष्टः भणितश्च। निःकृष्टो ऽसि योन्यर्थी। तव सर्वाङ्गे योनयो भवन्तु इति शप्तः। ततः सहस्रभगो ऽभूत्। तान् दृष्ट्वा लज्जितः शचीपतिः। तदनु पादयोः पतितः क्षन्तव्यमिति। तदनु करुणया तेन सहस्रलोचनः कृतः। एवं सुरीसमन्वितो ऽपि यः सेवते तापसीं स किं छायां त्यजति। पुनरभाणि तया—तर्हि मार्तण्डसमीपं ध्रियते। स उवाच—

तेनैकदा सौरीपुराधीशान्धकवृष्णेः पुत्रीं कुन्तीं स्नान्तीं दृष्ट्वा सेविता। यो ऽदत्तां कुन्तीं गृह्णाति स किं दत्तां छायां त्यजति। पुनरभाणि—एवं चेद्यमसमीपं म्रियते। तेनोक्तम्—एवमस्तु। स नैष्ठिकः ब्रह्मचारीति। यमपुरीं गत्वा तत्समीपे तां धृत्वा तीर्थयात्रां गतौ मातापितरौ।

इतः छाया सयौवना जाता। तद्रूपं दृष्ट्वा यमो ऽस्य सूत्रस्यार्थं सत्यं कृतवान्।

संसर्गाद् दुर्बलां जीर्णां भ्रश्यन्तीमप्यनिच्छतीम्।
कुष्ठिनीं रोगिणीं काणां विरूपां क्षीणविग्रहाम्॥
निन्दितां निन्द्यजातीयां स्वजातीयां तपस्विनीम्।
बालामपि तिरश्चीं स्त्रीं कामी भोक्तुं प्रवर्तते॥ इति।

तदनु तेनासक्तचित्तेन सा स्वभार्या कृता। स ब्रह्मचारीति प्रसिद्धः। जनापवादभयेन तां दिवा गिलित्वा रात्रौ उद्गील्य तया सह भोगान् सेवते। स दिनं प्रति गङ्गां स्नानार्थं गच्छति। तत्र तां लतागृहे निधाय स्नातुं प्रविष्टः। अत्रान्तरे सा पवनेन अग्निना च दृष्टा। तदनु पवनो ऽग्निना भणितः। यथास्या मम च मेलापको भवति तथा कुरु। तेनोक्तम्—किमेवं शक्यते। यमः प्रचण्डः। अग्निर्बभाण—दृष्टे सति प्रचण्डो ऽन्यथा किम्? पवनेन तथा तयोः संयोगो ऽकारि। रत्यवसाने तयोक्तम्—हे अग्ने, यमस्य निर्गमनवेला बभूव। गच्छ स्वस्थानम्। तेनोक्तम्—त्वां विहाय गन्तुं न शक्नोमि। तया स गिलितः। तदनु यमेन निर्गत्य सा गिलिता। सा उदरमध्ये उद्गील्य तेन सह क्रीडां करोति। ततो ऽह्यग्न्यभावे द्विजानां होमादिकं नष्टम्। तदभावे त्रैलोक्यस्य संतापो ऽभूत्। देवैः ध्यानेनावलोकिते सति कारणं ज्ञातं संतापस्य। तदनु पवनः पृष्टः। तेनाभाणि। मयाग्निशुद्धिर्नावगम्यते। तथापि सर्वे आमन्त्रिताः। सर्वे ऽपि तद्गृहं गताः। तेन चोपवेशिताः। पादप्रक्षालनादिके कृते सर्वस्य एकैकम् आसनं दत्तम्। यमायासनत्रयम्। तेन कारणे पृष्टे पवनेनोक्तम्—छायामुद्गिल। तत उद्गिलिता। तस्या अप्युक्तम्—अनलमुद्गिलेति। तया सो ऽप्युद्गिलितः। ततस्तस्याः कूर्चश्मश्रुकेशा उपप्लुष्टाः। तेन तत्प्रभृति वनितास्तद्रहिता बभूवुः। अग्निं दृष्ट्वा गदां गृहीत्वा तं मारयितुमुत्थितो यमः। स भयान्नश्यन् सन् सर्वगतो ऽभूत्। एवं सर्वं विद्यते न वा। तैरुक्तम्—सत्यं विद्यते। यमेनाग्निर्न ज्ञातः। किं तस्य सर्ववेदित्वं नष्टम्। द्विजैरुक्तम्—न। तर्ह्यस्यापि गुणा मा नश्यन्त्विति जिते भवतु मार्जारस्तथाविधः, गृहीतो ऽस्माभिः। इदं धनुरिमे गदे विक्रीयन्ते नो वा। किरातेनोक्तम्—विक्रीयन्ते। धनुषः किं मूल्यं तथा गदायाश्चेत्युक्तम्। किरातेनोक्तम् प्रत्येकं सुवर्णद्वादशसहस्रमिति। किमेतेषां सामर्थ्यम्। कथ्यते मया। अनेन धनुषा इमे बाणा विसर्जिताः सन्त शतयोजनानि गत्वा शत्रुं निर्मूलयन्ति। इमे गदे महापर्वतान् चूर्णयत इति। द्विजैर्भण्यते—एवं सामर्थ्योपेताः पदार्थाः कस्य विकाराः। किरातेन भण्यते—मया मार्गे गच्छता अरण्ये स्वयमेव मृतो महामूषिको दृष्टः। तयोरस्थ्नामिमे विकारा इति। केनचिद् द्विजेन भणितम्—त्वदीयं वस्त्रं गतं, येन कौपीनं परिधायागतो ऽसि। तेनोच्यते—अहं कोटीभटो ऽमीषां विक्रयणार्थमागच्छन् मार्गे चौरैर्मुषितः। इति श्रवणादनु सर्वैरुपहसितम्—एवंविधाः पदार्थाः स्वनिकटे सन्ति स्वयं कोटीभटस्तथापि मुषितः इति। स बभाण—किमिति हसनं विधीयते। तैरभाणि—मूषिकयोरस्थ्नामायुधानि किं भवन्ति। कोटीभटः किं चौरैर्मुष्यते। स बभाण—किमिदमेव कौतुकम्। भवत्पुराणे किमेवंविधं कौतुकं नास्ति। किमेवमस्ति। यद्यस्ति तर्हि ब्रूहि। एवमस्तु। प्रोच्यते। शृणुत।

युष्मत्पुराणे शतबलीति प्रसिद्धो राक्षसः । स स्वपुत्रं सहस्रबलिं स्वपदे निधाय स्वयमेकस्मिन् पर्वते तपः कर्तुं लग्नः। तत्पुत्रप्रतापं दृष्ट्वा देवकोटिभिश्चिन्तितम्—अयमस्मान्निर्मूलयिष्यति । यावत्प्रौढो न भवति तावद् विनाश्यत इति। तन्मारणार्थमिच्छद्भिः शतबलिर्दृष्टः। भणितं च। यावदयं न मार्यते तावत् सहस्रबलेर्मारणं दुर्घटम्। अयं च तपस्वी शस्त्रेण मारयितुमस्माकं न युक्तम्। इत्यादि पर्यालोच्य वज्रकण्टकवज्जिह्वैर्गवयैर्लेहयित्वा मारितः। तस्य शिरो द्विभागीकृतम्। एकस्यांशस्य इन्द्रेण वज्रायुधं कृतम्। अपरस्य विष्णुना चक्रे कृते महेश्वरेण तस्य पृष्ठास्थि गृहीत्वा द्वौ अंशौ छेदयित्वा मध्यमांशस्य पिनाकं नाम धनुः कृतम्। इतरांशयोर्गाण्डीवं नाम धनुः। तच्च वरुणाय दत्तम्। तेनाप्यग्नये तेन चार्जुनाय दत्तम्। कुक्षिप्रदेश-स्थितान्यस्थीनि त्रयस्त्रिंशद्देवानां धनूंषि बभूवुः। नलकजङ्घाबाह्वस्थ्नां सप्तशलगदा बभूवुः। तत्र रुधिरमुखी भीमाय नीलमुखी दुर्योधनाय यमाय यमदण्डः। अन्या अन्येभ्यो देवेभ्यो दत्ताः। अपरास्थ्नां त्रयस्त्रिंशत्कोटिदेवानामायुधानि जातानि । स्नायवः ब्रह्मपाशा अजनिषत। तेन धनुषा महेश्वरेण देवासुरा निर्जिताः। अर्जुनेन इन्द्रवनं दग्धम्। अग्निबाणैः सैन्धवस्य शिरो गृहीतम्। युधिष्ठिरस्य यज्ञविधानार्थं लङ्कायाः स्वर्णं, तैरेवानीतम्। तद्बाणेन भूमिं विदार्य पातालं प्रविष्टो ऽर्जुनः। तत्र नागराजेन युद्धं कृत्वा जित्वा च नागदत्तां तत्पुत्रीं परिणीय तया तेन सहागत्य यज्ञमण्डपं प्रविष्टः। भीमसेनः प्रतिसन्धि सिंहसहस्रबलान्वितः मल्लविद्यया नारायणस्यापि दुर्जयः। तथापि कुलनामराक्षसेन धृतः। अर्जुनेन इन्द्रकीलस्योपरि मायाशूकरनिमित्तं महेश्वरो निर्जितः। यमेन सोमिनी नाम ब्राह्मणी यमपुरीं नीता। तद्ब्राह्मणाक्रोशवशेनार्जुनेन यमपुरीं गत्वा युद्धे तं बद्ध्वा विमुच्य सा आनीता। तथा तेन स्वबाणपिच्छार्थिना गरुडपक्षपिच्छग्रहणे युद्धे जाते नारायणो ऽपि बद्धः। तथा सप्त दिनानि भूमिमुद्धृत्य स्थितः। पार्थः एवंविधायुधालङ्कृतः तथाविधसामर्थ्यान्वितो ऽपि मार्गे गच्छन् केनचिद् भिल्लेन मुषितः। इति सर्वं विद्यते नो वा। सत्यम्, विद्यते। तर्हि तत्र भवतां किमिति विस्मयो नास्ति। अत्रैव संजातः। इति बहुधा जित्वोद्यानं गत्वा मनोवेगेन भण्यते। हे मित्र, अपरमपि पुराणं शृणु। तथाहि।

ईश्वर एकदा नृत्यन् दारुकवनं प्रविष्टः। तत्र तापसवनितास्तं दृष्ट्वा मोहिता बभूवुः। तथा सो ऽपि। तेन सर्वाभिः क्रीडितम्। तास्तस्यैवासक्ता जाताः। तापसानां पादप्रक्षालनमपि न कुर्वन्ति। तापसैर्गूढवेषैरवलोकयद्भिः ताभिः सह क्रीडन् दृष्टः। शापेन तस्य लिङ्गं पातितम्। तेनापि तत्सर्वेषां ललाटे लग्नं कृतम्। तदनु तैरीश्वरं ज्ञात्वा पादयोः पतितं भणितं च—वारमेकं क्षन्तव्यं, ललाटस्थं लिङ्गं स्फेटनीयम्। तेनोक्तम्—मदीयं लिङ्गं गृहीत्वा कैलासमागच्छन्तु। एवं कुर्महे इति यावत् तदुत्पाट्य स्कन्धे निक्षिपन्ति तावद् वर्धितुं लग्नम्। इत्यपरापरतापसैर्गृहीत्वा महता कष्टेन कैलासमानीतम्। तदनु गौरी हसिता तुष्टा च भणति महेश्वराय। यथामीषां ललाटस्थं लिङ्गं गच्छति तथा कर्तव्यमिति महेश्वरेणोक्तम्—इदं योनिस्थं लिङ्गं यदा पूजयन्तु [न्ति] तदा ललाटस्थं लिङ्गं याति नान्यथा। इति ते ऽपि पूजयितुं लग्ना इति। तथापरमपि शृणु। हे मित्र तद्यथा—

पूर्वमत्र सचराचरलोको नास्ति। बहुकालेनैकदाकस्मादण्डमुत्पन्नम्। तत् कियत्स्वहस्सु स्फुटितम्। तस्याधस्तनभागः सप्तनरकाः। मध्यभागः उर्वीमकरपर्वताकराविर्बभूव। उपरितनभागः स्वर्गादिरूर्ध्वलोको ऽजनि। मध्ये शंकरः स्थितः। स शङ्कया दिग्वलोकनं किल यदा

करोति, तावत्किमपि नश्यति। भयचकितचित्तेन दक्षिणभुजे ऽवलोकिते ब्रह्मा उत्थितः। वामभुजावलोकनेन वासुदेवो जातः। त्रयो ऽपि कियत्कालं यावत्तिष्ठन्ति स्त्रीरूपाभावे ऽनङ्गाग्निना संतप्ता बभूवुः। ततो वासुदेवेन स्त्रीरूपं खटिकया लिखितम्। तस्यां ब्रह्मणा चैतन्यं प्रापितम्। तदनु सा नग्नरूपेणोत्थिता। महेश्वरेण वस्त्रं दत्तम्। हस्तश्च धृतः। ततो वासुदेवेन भणितम्—मया लिखिता। अहं स्वामी। ब्रह्मणोदितम्—मया चैतन्यं प्रापिता। अहं स्वामी। इति झगडके सति त्रिभिरितस्तत आकृष्टा। त्रयस्त्रिंशत्कोटिदेवैर्भणितम्—विचार्य एकेन स्त्री कर्तव्येति। कथं विचारः। सुरैरभाणि—येन प्रथममुत्पादिता स पिता। येन चैतन्यं प्रापिता स माता। वस्त्रदाता वल्लभ इति शिवाय दत्ता। तया सह सुखेन स्थितं शङ्करं दृष्ट्वा पुनरितराभ्याम् अमर्षात् युद्धे कृते सा लज्जया जलं बभूव। नदीरूपेण वोढुं लग्ना। सा नदी गङ्गा जाता। पुनस्ते मैत्रीं गताः। तस्या विस्तारं दृष्ट्वा त्रयो ऽपि तदनुभवनार्थं पूर्ववद् विष्णू रूपं, ब्रह्मा चैतन्यं, महेश्वरो वस्त्रादिकं करोति। तत इदं सूत्रम्—

कार्यं विष्णुः क्रिया ब्रह्मा कारणं तु महेश्वरः।
एकमूर्तित्रयो भागा ब्रह्मविष्णुमहेश्वराः॥

ततो बहुजनसंपूर्णो जातो लोकः। एवं लोकोत्पत्तिं कृत्वा बहुकाले गते हरिब्रह्मणोर्झगडको जातः। अह (ह) महं महानिति। ततो महेश्वरेणोक्तम्—कोलाहलो न विधेयः। एको मम शिरो ऽवलोकयापरः पादावलोक्य प्रथममागच्छति स महानिति। तदनु शंकरः ऊर्ध्वलोके शिरः, मध्यलोके लिङ्गम्, अधोलोके पादौ विधाय स्थित्वा मूषिकप्रमाणतनुः स्थूलपुच्छः पृष्ठे रेखात्रयालङ्कृतः खडिहलकरूपेणोपरि गतः। महता कष्टेन यावन्नाभिप्रदेशं गच्छति तावत्केतकीमागच्छन्तीं दृष्ट्वा कस्मादागतासीति ब्रह्मणा तयोक्तम्—महेश्वरमस्तकस्थितपिङ्गलजटायाः सकाशात्। कियत्कालं निर्गता। दिव्यषण्मासान्। ततस्तेन प्रार्थिता। अहमनेन पिङ्गलजटायाः सकाशादानीतेति भणितव्यम्। एवमस्त्वित्यभ्युपगतं तया। ततो व्याघुटितो ब्रह्मा आगत्य भणति—तव शिरो दृष्ट्वा तत्र पिङ्गलजटायां स्थिता केतकी आनीतेति पृष्टया तयाप्येवमित्युक्तम्। ततः शिवो ज्ञात्वा मौनेन स्थितः। हरिर्वराहरूपेण जङ्घप्रदेशं गतो ऽग्रे गन्तुमशक्तः सन्नागत्य भणति—शिव, तव जङ्घपर्यन्तं गतो ऽहमिति। ततस्तुष्टेन शङ्करेण भणितं वासुदेवाय त्वं राजपूज्यो भव श्रियालंकृतश्च। ब्रह्मणः प्रतिपादयति—त्वं मृषाभाषी सूत्रमिदमसत्यं कृतवान्। तच्च किम्—

सत्यादुत्पद्यते धर्मो दयादानेन वर्धते।
क्षमया स्थाप्यते धर्मः क्रोधलोभाद्विनश्यति॥

अतस्त्वं भिक्षाभाजनं पूजारहितश्च भवेति शापितः। केतक्यपि मृषाभाषिणीति मम मस्तकारोहणं मा करोदिति निषिद्धा किल लिङ्गपुराणे। अतो महेश्वरस्योर्ध्वलोके शिरः मध्यलोके लिङ्गम् अधोलोके पादौ किल पूज्यौ। हे मित्र, यद्येते सर्वज्ञा महेश्वरस्तयोर्गुरुलघुत्वं कुतो न जानाति। तावप्यात्मनोर्गमनाशक्तित्वं न जानीतः इत्येतेषां विरुद्धम्। अनेन निरूपितम्—अतो मया एतेषां नमनं विहाय एवंविधस्य नतिः क्रियते। किंविशिष्टस्य।

पातालं येन सर्वं त्रिभुवनसहितं सासुरेन्द्रामरेन्द्रं
भग्नं स्वैः पुष्पबाणैः भयचकितबलं स्त्रीशरण्यैकनिष्ठम्।
सो ऽयं त्रैलोक्यधीरः प्रहतरिपुबलो मन्मथो येन भग्न-
स्तं वन्दे देवदेवं वृषभहरिहरिं शङ्करं लोकनाथम्॥

इत्येवमादिना वचनालापेन मित्रस्य चित्तं मृदुतामानीतम् ॥छ॥

ततो ऽपरदिने ऋषी भूत्वा पश्चिमगोपुरे तत्क्रमेणोपविष्टौ। द्विजैस्तत्क्रमेण संभाषणादिके कृते न किंचिद्विरुद्धम् इति प्रतिपाद्य तथैव भूमावुपविष्टे विप्रैर्गुरौ तपश्चरणकारणे च पृष्टे नावयोर्गुरुरस्ति, तर्हि कथं तपः। कथयितुं बिभेमि। मा भैषीः। गुणवर्मणः कथा किं न क्रियते। सा किंरूपा। प्रतिपादयति खगः। चम्पापुरे राजा गुणवर्मा, मन्त्री हरिः, तेनैकदा बहिर्गतेन सरोवरे शिला प्लवन्ती दृष्टा। राज्ञे कथितम्। राज्ञा ग्रहो लग्न इति प्रतिनिगृहीतः। तेनोक्तम्—ब्रह्मराक्षसोऽहम्। गच्छामीति विसर्जितः। स मन्त्रिणा स्वहृदये वैरं स्मरता स्वोद्याने मर्कटाः संगीतकं कर्तुं शिक्षिताः। कथम्। यदैव मनुष्यमवलोकयन्ति तदैव नृत्यन्ति यथा सुशिक्षितेषु। मन्त्रिणा राजा उद्यानं नीतः। तस्यैव तन्नृत्यं दर्शितम्। दृष्ट्वा राज्ञोक्तम्—अहो विचित्रं मर्कटानां संगीतकम् इति। तदनु मन्त्रिणा धृत्वा राजभवनं नीतः ग्रहो लग्न इति धूपः प्रदर्शितः। राज्ञोक्तम्—झोटिंगोऽहं गच्छामि। तदनु विसर्जितः। स्वस्थेन राज्ञोक्तम्—सम्यग्मया दृष्टम्। किमर्थमेतत् कृतम्। मन्त्रिणोक्तम्—अश्रद्धं [अश्रद्धेयं] न वक्तव्यं प्रत्यक्षमपि यद्भवेत्।

यथा वानरसंगीतं यथा सा प्लवते शिला॥

इति श्रुत्वा द्विजैरुक्तम्—न तादृशः को ऽपि। कथय। एकान्तग्राहिणः कथा किं न विधीयते। किंविशिष्टा सा। स आह। वन्दुरवारे पुरे राज्ञो दुर्धरस्य पुत्रो जात्यन्धः। स च केनचित् प्रशंसितः सन् स्वान्याभरणानि ददाति। बहुकालेन पुत्रो ऽयोमयैराभरणैर्विभूषितः कृतः। उक्तं च तस्य। हे पुत्र, इमान्याम्नायागतानि देवताधिष्ठानि विभूषणानि। यो यो ऽयोमयानीति भणति स अनेन लकुटेन हन्तव्य इति निरूपिते स तथा करोति। न तादृशः को ऽपि। निवेदय। कथ्यते। अयोध्यापुरे वणिक्-समुद्रदत्तस्य पुत्रावावां वसतौ ऋषिपार्श्वे पठावः। चतुर्दशीदिने गुरोः कुण्डिकां भर्तुं यावद् गच्छावः, तावद्राजहस्ती स्तम्भमुन्मूल्य सर्वान् मारयन् आवयोर्मारणार्थमागतः। आवां पलाय्य नगरबहिरेरण्डशाखायां कुण्डिकामवलम्ब्य झम्पनमपसार्य तत्र प्रविश्य झम्पने दत्ते पिप्पलिकां दातुं विस्मृतौ। तद्द्वारेण हस्ती प्रविष्टः। तद्भयादावां तन्मध्ये नश्यावः। स च पृष्ठे लगति। यावत् षण्मासान् तत्र स्थातुमशक्तौ तद्द्वारेण निर्गतावावाम्। गजो ऽपि तेनैव निर्गतः। पुच्छबाल एको न निर्गच्छतीति हस्ती स्थितः। आवामृषी भूत्वा यात्रागताविति तपश्चरणकारणं भणितम्। श्रुत्वा विप्रैर्भणितम्। अहो दिगम्बरस्य वचनमसत्यम्। तेनोक्तम्—कथमसत्यम्। कुण्डिकायां प्रवेशः, तद्भारेण शाखायाः अभङ्गो गजस्यापि प्रवेशः, उभयोः पलायनं, गजस्य पृष्ठतः प्रापणं, षण्मासान् उभयोर्निर्गमनं, गजबालस्यानिर्गमः, सर्वं विरुद्धम्। भवत्पुराणे किमीदृशं नास्ति। नास्ति, यद्यस्ति तर्हि कथय। कथ्यते। तद्यथा—

ब्रह्मा लोकं कृत्वा नारायणस्य हस्ते रक्षणार्थं प्रतिष्ठाप्य भिक्षार्थं गतः। विष्णुना हरभयाद् गिलितो लोको ऽनुगत्वातसीझाडावस्थितागस्त्यं दृष्ट्वोक्तम्। लोकरक्षणार्थं मया क्व प्रविश्यते। मुनिनोक्तम्—अतसीशाखामवलम्ब्य कुण्डिका तिष्ठति। तत्र प्रविश। प्रविष्टः। तत्र सप्तसागरान् दृष्टवान्। क्षीरसागरमध्यस्थितद्वादशयोजनमध्यस्थितविस्तारवटवृक्षपत्रसंपुटमध्ये सुप्तः। भिक्षां गृहीत्वा आगतो ब्रह्मा तमपश्यन्नितस्ततो ऽवलोकयन् अगस्त्यं दृष्ट्वा पृष्टवान्—'भगवता हरिर्दृष्ट इति'। मुनिनोक्तम्—कमण्डलुमध्ये ऽवलोकय। ततः षण्मासान् विलोक्य तत्र सुप्तो दृष्टः। तदुदरे तिष्ठतीति ज्ञात्वा कथं प्रविश्यत इति यावच्चिन्तयति तावत्तेन जृम्भः कृतः। तदवसरे प्रविश्य हरिर्नाभौ स्थितः। कमलनालच्छिद्रेण लोकं निःसार्य स्वस्य निर्गमने सर्वाङ्गं निर्गतम्। मुष्ककोशो

न निर्गतः इति कमलासनो ऽभूदिति विद्यते नो वा। तैरुक्तम्—सत्यं, विद्यते। तर्हि तद्भवताम-सत्यमिति न प्रतिभासते, इदं तु तथा भासते इति कथं शोभते। इति निरुत्तरं जित्वा मनोवेगे-नोक्तम्—तथापरापि कथा भवन्मते विद्यते।

कुरुजाङ्गलदेशे हस्तिनागपुरेशयुधिष्ठिरेण यज्ञं कारयितुं प्रारब्धम्। कथम्। 'अश्वमेधे हयं हन्यात् पौण्डरीके च दन्तिनम्।' इति वेदोक्तक्रमेण। तथापि पुण्यं न लभते। पृष्टेन केनचिन्नै-मित्तिकेनोक्तम्—असुराः फलं गृह्णन्ति, कथं निवार्यन्ते। तेनोक्तम्—ऋषिनाथः अगस्तिः पाताले तिष्ठति। स धरणेन्द्रेण सहानीय यज्ञमण्डपे उपवेशितश्चेन्न हरन्ति। कथमानीयते इति सचिन्तो राजा अर्जुनेन भणितः। मया आनीयते, प्रेषणं प्रयच्छ। इति दत्ते तस्मिन् अर्जुनो बाणेन भूमिं विद्ध्वा तच्छुषिरेण पातालं प्रविश्य धरणेन्द्रेण युद्धं कृत्वा तं बद्ध्वा विमुच्य तत्पुत्रीं नागदत्तां परिणीय अर्जुनः ऋषिनाथं धरणेन्द्रेण दशकोटिबलेन सहानीतवान्। इति अस्ति नो वा। नास्तीति केन भण्यते। तस्य सूक्ष्मच्छिद्रेण प्रवेष्टुमुचितं, नावयोरिति कथं युक्तम्। तैरुक्तम्—भवतु प्रवेशः। कथं तत्रात्रगाहः। तेनोक्तम्—अङ्गुष्ठपर्वमात्रोत्सेधधारिणागस्त्येन समुद्रः शोषितः। तदुदरे मकराकरस्यावगाहो भवति। नास्माकं कुण्डकाभ्यन्तर इति केषां वाचोयुक्तिरिति। स तथा जित्वोद्यानं गतवान्। मनोवेगो भणति स्म मित्राय। यदा ब्रह्मणा लोको विहितः क्व स्थित्वा विहितः। विष्णुना गिलिते तस्मिन् क्व भिक्षां याचितवान्। क्वातसीक्षेत्रं स्थितम् इति विचारासहत्वादेतद्विरुद्धम्। पवनवेगेन भणितम्—तर्हि लोकः कथमुत्पन्नः। स आह—"कालः सर्वज्ञनाथश्च जीवलोकस्तथागमः। अनादि-निधना ह्येते द्रव्यरूपेण संस्थिताः" इति लोको ऽनाद्यनिधनः। जीवादि-पदार्थाधिकरणभूतः समन्तादनन्तानन्ताकाशबहुमध्यप्रदेशस्थिततनुवात-घनानिलघनोदधिनामभिर्वातैर्वेष्टितः। अधःसमचतुरस्रसप्तरज्जुविस्तृतः चतुर्दशरज्जूत्सेधवान् पूर्वा-परदिग्विभागयोर्हानिविस्तारवान्। कथम्। पूर्वापरदिग्भागयोः समः। तन्मध्ये समचतुरस्रैक-रज्जुविस्तारेण चतुर्दशरज्जूत्सेधवती त्रसनाडिः। तन्मध्ये महामेरुः। तस्याधःस्थिता नरकाः सप्त। ते च के। रत्नप्रभा १ शर्कराप्रभा २ बालुकाप्रभा ३ पङ्कप्रभा ४ धूम्रप्रभा ५ तमःप्रभा ६ महा-तमःप्रभा ७ श्चेति। मेरुपरिवृताः शुभनामानो द्वीपसमुद्राः। ते च के। जम्बूद्वीपः लवणसमुद्रः। धातकीखण्डद्वीपः कालोदकसमुद्रः। पुष्करद्वीपः पुष्करसमुद्रः। वारुणीद्वीपः वारुणीसमुद्रः। क्षीरद्वीपसमुद्रः। क्षौद्रद्वीपसमुद्रः। इत्यादि असंख्यात द्वीपसमुद्राः। द्विगुणद्विगुणविस्ताराः मेरो-रुपरि स्वर्गाः। ते च सौधर्म १ ईशान २ सनत्कुमार ३ माहेन्द्र ४ ब्रह्म ५ ब्रह्मोत्तर ६ लोकान्त ७ काम्पिष्ट ८ शुक्र ९ महाशुक्र १० शतार ११ सहस्रार १२ आनत १३ प्राणत १४ आरण १५ अच्युता १६ श्चेति षोडश स्वर्गाः। तेषामुपरि नव ग्रैवेयकाः। तेषामुपरि नवानुदिशाः। तेषामुपरि विजय १ वैजयन्त २ जयन्त ३ अपराजित ४ सर्वार्थसिद्धि ५ श्चेति पञ्चानुत्तराः। तेषामुपरि सिद्ध-क्षेत्रम्। इति लोकस्वरूपं विस्तरतः करणानुयोगाद् ज्ञातव्यम्। इति वचनामृतसहस्रेण मित्राय लोकस्थितिं प्रतिपाद्य ततो ऽन्येद्युः भौतिको भूत्वा दक्षिणगोपुरे तत्क्रमेणोपवेशने संभाषणे च जाते द्विजैः को गुरुः, किं कारणं तपसः इति पृष्टे तेनोक्तम्—नावयोर्गुरुरस्ति। गुरुं विना किं तपो ऽस्ति, कथ्यताम्। बिभेमि। मा भैषीः। पित्तज्वरगृहीतस्य कथा किं न विधीयते। कथम्। पित्तज्वरगृहीतस्य मधुरं नावभासते तथा युष्माकं सत्यमप्यस्मद्वचः इति। कथ्यते, यथोक्तं विचा-र्यते। कथय। आम्रस्य कथा न किं विधीयते? कीदृशी सा। निगद्यते तेन। तथा हि।

अङ्गदेशे चम्पापुरे नृपशेखराय केनचिद्वणिजा पलितवलिस्तम्भकारि आम्रस्य बीजं

दत्तम् । भूपेन वनपालस्यास्य वृक्षं कृत्वा यदा पक्वफलमानयसि तदा तुष्टिर्दीयते इति समर्पितम् । तेन उप्तम् । तद्वृक्षे फलमायाते एकदा गृध्रे सर्पं गृहीत्वा खे गच्छति सति विषबिन्दुः फलस्योपरि पतितः । तदूष्मणा पक्वं फलं वनपालेनानीय राज्ञे समर्पितम् । तेन च युवराजाय दत्तम् । तद्भक्षणान्मृतः । राज्ञा कोपात् स वृक्षः सत्फलः छेदितः । अत्र सर्वे विचारका एव । प्रतिपादय । एवंविधो ऽस्ति । नास्ति को ऽपि । कथय ।

अयोध्यायां वणिग्धनदत्तस्य पुत्री देवदत्ता वसुदेवाय दत्ता । पाणिग्रहणार्थं वेदिकायाम् उभयोर्मध्ये ऽन्तःपटो धृतः । तदवसरे राजहस्ती बन्धनानि त्रोटयित्वा निर्गतः तद्भयान्नश्यतो वसुदत्तस्य पाणिर्देवदत्ताया लग्नः । तत्स्पर्शमात्रेण तस्याः गर्भः स्थितः । नवमे मासे बहवो भौतिका धनदत्तेन गृहमानीताः । देवदत्तया कस्मात् किमर्थमागता इति संभाषणे कृते दक्षिणापथादागताः, द्वादशवर्षदुर्भिक्षभयादिति कथितम् । मया गर्भस्थेन श्रुत्वा चिन्तितम् । बहिर्दुर्भिक्षकालः प्रवर्तते । अतो ऽत्रैव तिष्ठामीति स्थितो ऽहम् । तत्र द्वादश वर्षेषु गतेषु पुनस्तैरागत्य दुर्भिक्षो गतः, स्वदेशं गम्यते इति प्रतिपादितम् । श्रुत्वाहं मम मातुर्मुखान्निर्गतः । तदा मन्माता चुल्लीसमीपे स्थितेति अहं तत्र पतितः । उत्थाय मया मन्मातुश्चीरं धृत्वा भोजने याचिते सा राक्षसो ऽयमिति भणित्वा पलायिता । सर्वंविचार्य निर्धारितो ऽहं जटाधरो जातः । एकदायोध्यायां गत्वा मातृपित्रोर्विवाहं दृष्टवान् विहरन्नत्र समायातः । इति तपश्चरणकारणं भणितं श्रुत्वा तैरुक्तम् । अहो विस्मयकारि तपस्विनो वचनम् । तद्यथा—पुरुषबाहुस्पर्शनमात्रेण गर्भसंभूतिः । गर्भे स्थित्वा श्रवणम् । द्वादश वर्षाणि तत्र स्थितिः । मुखान्निर्गमनम् । उत्पन्नसमय एव भोजनं याचितम् । त्वयि पुत्रे तव मातुः कन्यात्वं च विरुद्धम् । न विरुद्धं भवन्मते ऽपि सद्भावात् । अस्मन्मते किमेवं विद्यते, किं न विद्यते । यद्यस्ति तर्हि कथय । कथ्यते—

अयोध्यायां तृतीयारथ्याख्ये क्षत्रियपुत्र्यौ कृतचतुर्थस्नाने एकस्मिन् शयनतले सुप्ते । परस्परस्पर्शनेन एकस्या गर्भे भगीरथ उत्पन्नः इति । तथा सौरीपुरेशान्धकवृष्णिः । तस्य भ्रातुर्नरवृष्णेः पुत्री गान्धारी । हस्तिनागपुरेशव्यासपुत्रजात्यन्धकधृतराष्ट्राय दास्यामीति पित्रा प्रतिपन्नम् । तया एकदा चतुर्थस्नानं कृत्वा धृतराष्ट्रो ऽयमिति पनसवृक्ष आलिङ्गितः । ततो गर्भसंभूतौ नवमासावसाने पनसफलं निर्गतम् । तत्र दुर्योधनादि पुत्रशतं स्थितमिति विद्यते नो वा । भवतु । कथं गर्भस्य श्रवणमिति । किं भवन्मते प्रसिद्धं न विद्यते । किमेवं विद्यते । कथ्यते ।

द्वारवत्यां विष्णोर्भगिनी सुभद्रा पाण्डुपुत्रायार्जुनाय दत्ता । गर्भसंभूतौ प्रसूत्यर्थं स्वभ्रातुर्गृहमागता । तस्या रात्रौ नारायणः कथां कथयति । चक्रव्यूहकथने क्रियमाणे निद्रिता सा । प्रतिध्वन्यभावे तूष्णीं स्थिते वासुदेवे गर्भस्थेन भणिते वासुदेवेन ध्यातम् । अहो कश्चिदसुरो भविष्यति । तत उत्पन्नो ऽभिमन्युः । किं सत्यमसत्यं वा । नासत्यम् । तर्हि तस्य श्रवणमुचितं न ममेति को ऽयं पक्षपातः । भवतु श्रवणं, कथं द्वादशवर्षाणि गर्भस्थितिः । किं युष्मन्मते नास्ति । नास्ति । यद्यस्ति तर्हि कथय । कथ्यते । एकस्मिन्नरण्ये मदस्तपः करोति । एकस्यां रात्रौ इन्द्रियक्षरणे जाते सरसि कौपीनं प्रक्षाल्य कमल-कर्णिकायां निश्च्योतितम् । तत्र स्थितमिन्द्रियरजः मण्डूक्या गिलितम् । तदनु गर्भो जातः । प्रसूता पुत्री । अहो मज्जातौ किं मानुषी देवी वेयं जाता । तत्कर्णिकायाम् उपवेश्य सर्वा अवलोकयन्त्यः स्थिताः । मयेन संध्यावन्दनार्थमागतेन दृष्ट्वा मत्पुत्रीयमिति ज्ञात्वा स्वावासं नीता । मन्दोदरीसंज्ञापोषिता वृद्धिं गता । एकस्मिन् दिने सा तत्र कौपीनं गृहीत्वा स्नातुं गता । तत्र लग्नमिन्द्रियमार्द्रीभूय तत्प्रजनेन प्रविष्टम् । तदनु गर्भः स्थितः । ऋषिरुदरवृद्धि

दृष्ट्वा विस्मितः। ज्ञानेन ज्ञात्वा यावत्ते पतिर्भवति तावद् गर्भः स्थिरो भवत्विति स्तम्भितः। ततः सप्तशतवर्षेषु गतेषु लंकायां रावण उत्पन्नो राज्ये स्थितः। एकदा पार्पधि गतः। मन्दोदरीं दृष्ट्वासक्तो जातः। अनुयाचिता ऋषिणा दत्ता। तां परिणीय स्वपुरं गतः। तस्याः पुत्र इन्द्रजिज्जातः। एतद्भवति नो वा। भवत्येव।

एवं तर्हि तस्या गर्भे सप्तशतवर्षाणि स्थातुमुचितम्। न ममेति को ऽयं नियमः। भवतु तत्र स्थितिः। कथं मुखनिर्गमनम्। कथं कर्णस्य कर्णनिर्गमनम्। भवतु मुखनिर्गमनम्। कथं तदैव भोजनयाचनम्। किं भवद्भिः स्वमतं न ज्ञातम्। त्वया ज्ञातं चेत् ब्रूहि। प्रोच्यते।

पाराशरो नाम प्रसिद्ध ऋषिः गङ्गायाः परतीरगमनार्थं तारकमपश्यन् तत्पुत्रीं योजनगन्धां दृष्ट्वा मामुत्तारयेत्युक्तवान्। तयोक्तम्। त्वं देवर्षिः। अहं निकृष्टा। उभयोः कथं सह यानम्। तयोक्तम्। तेनोक्तम्। न दोषः इति। नावं चटयित्वा याने नदीमध्ये आसक्तचित्तेनोक्तम्। मामिच्छ। नोचितम्। तेनोक्तम्। भणितं कुरु। तव शरीरे सौगन्ध्यं करोमीति। कृते तस्मिन् पुनस्तयोक्तम्। जनाः पश्यन्ति। तेन नीहारः कृतः। पुनस्तयोक्तम्। नौर्न तिष्ठति। कथं सौख्यम्। तेन द्वीपाः कृताः। एकस्मिन् द्वीपे तया सह क्रीडितवान्। एवंविधस्य कथमेतज्जातम्। संगात्। तथा चोक्तम्।

ब्रह्मचर्यविशुद्धयर्थं त्यागः स्त्रीणां न केवलम्।
त्याज्यः पुंसामपि प्रायो विटविद्यावलम्बिनाम् ॥इति।

तपोऽग्निना दग्धकामेन्धनस्य कथमेतत्संभाव्यते। स्त्रीमुखावलोकनात्। तथा चोक्तम्।

क्षीणस्तपोभिः क्षपितः प्रवासैर्विध्यापितश्चारु समाधितो यैः।
तथापि चित्रं ज्वलति स्मराग्निः कान्ताजनापाङ्गविलोकनेन ॥इति।

क्रीडावसाने परतीरं गतः तदैव तस्या गर्भसंभूतौ सत्यां जटाजूटधरो लाकुटकौपीनसमन्वितो व्यास उत्पन्नः। तदैव तेनोक्तम्। मया कथं क्व तपः क्रियते। इति पृष्टे पाराशरेणोक्तम्। त्वयात्रैव तपः कर्तव्यमिति प्रतिपाद्य गतः। एतत् किं परमार्थभूतं नो वा। नेति केन भण्यते। तर्हि तदैव व्यासस्य तपःशिक्षां प्रष्टुमुचितम्। न मम भोजनयाचनमिति कथं प्रतिपाद्यते। भवतु तद्याचनम्। त्वयि पुत्रे जाते तव माता कथं कुमारी। किं न ज्ञायते भवद्भिः। न ज्ञायते। यदि त्वया ज्ञायते तर्हि कथय। कथ्यते।

कौन्त्याः सूर्येण गर्भो जातः। तदनु कर्णः पुत्रो जातः। तथापि सा कन्या। तथापरापि कथा।

उद्दालको नामर्षिः। स चैकदा गङ्गायां कृतस्नानः अनुकौपीनं प्रक्षाल्य कमलकर्णिकायां निपीडितवान्। तत्कमल-मयोध्याधिपरघुपतिसुता चन्द्रमती तत्र स्नातुं गता। तया समीचीनं दृष्ट्वाघ्रातम्। तदनु सा गृहमागता गर्भचिह्ने जाते मातापितृभ्यां पृष्टा। पुत्रि, कस्यायं गर्भः। तयोक्तम्। मया न ज्ञायते। नवमासावसाने तृणबिन्दुनामानं पुत्रं प्रसूता। स च जारपुत्र इति जनैर्भण्यते। सापि केनापि परिणीयते। एकदा भिक्षार्थमागतेनोद्दालकेन तृणबिन्दुं दृष्ट्वायं मम पुत्र इति ज्ञातम्। सा च राजसमीपे याचित्वा परिणीता। एतत् किं विद्यते नो वा। एवं तर्हि ताभ्यां पुत्रमातृभ्यां कन्यात्वं घटते। न मम मातुरिति कथं विचार्यते। इति हेतुनयदृष्टान्तैरनेकधा जित्वोद्यानं गतौ।

तदनु पवनवेगेन भणितम् । हे मित्र, यदि कर्णः कर्णेन निर्गतश्च न भवति, तर्हि तस्योत्पत्तिं ब्रूहि । मनोवेगः प्राह ।

अत्रैवार्यखण्डे कुरुजाङ्गलदेशे हस्तिनागपुरेशो विचित्रः । तस्य तिस्रो देव्यः, अम्बा, अम्बाला, अम्बिका चेति । तासां क्रमेण पुत्रा धृतराष्ट्रपाण्डुविदुराः । सूर्यपुराधिपान्धकवृष्णिभ्राता नरवृष्णिः । तत्पुत्री गान्धारी जात्यन्धकधृतराष्ट्राय दत्ता । अन्धकवृष्णिना भणितम् । मम पुत्र्यौ कौन्तीमाद्र्यौ पाण्डवे दास्यामीति । तच्छ्रुत्वा पाण्डुर्हृष्टः । पाण्डोः पाण्डुरोगपीडां श्रुत्वा राज्ञा मत्पुत्र्यौ अन्यस्मै दास्यामीत्युक्तम् । तच्छ्रुत्वा पाण्डुर्दुःखितः चिन्ताग्निना संतप्तगात्रः एकदोद्यानं गतः । तत्र लतागृहनिकटे मुद्रिका दृष्टा गृहीता च । तदवसरे व्याकुलीकृतान्तरङ्गश्चिन्तागतिर्नामा विद्याधरः समायातः । इतस्ततोऽवलोकितवांश्च । पाण्डुना दृष्ट्वोक्तम् । किं भवदीयेयं मुद्रिका । दृष्ट्वा तेनोक्तम् । भवत्येव । दत्ता । तेन खगेनोक्तम् । त्वत्प्रसादाज्जीवितोऽहम् । त्वं किमिति कृशः । कथिते वृत्तान्ते वियच्चरेणोक्तम् । इयं काममुद्रिकाभीष्टं रूपं प्रयच्छति । एतन्माहात्म्याद‍भिलषितसुखानुभवनं कुरु । पश्चान्मया गृह्यते इति दत्ता तेन । पाण्डुस्तां गृहीत्वा सूर्यपुरीं गतः । कुन्त्या जलक्रीडावसरे तदुद्यानं प्रविष्टः । काममुद्रिकाप्रभावेण विशिष्टं रूपमात्मीयं तस्या दर्शितम् । तेन सा चासक्ता बभूव । स च स्त्रीरूपेण तद्गृहं प्रविष्टः । अष्टादशदिनानि तया सह स्थित्वा स्वपुरं गतः । इतस्तस्या गर्भे जाते मातापितृभ्यां पृष्टा । तया सर्वं कथितम् । गूढगर्भेण पुत्रं प्रसूता । स च मञ्जूषायां निक्षिप्य स्ववंशावल्या सह यमुनायां प्रवाहितः । अङ्गदेशे चम्पापुरेशसूर्येण तं दृष्ट्वा स्वदेव्या राधायाः समर्पितः । स च मञ्जूषायां कर्णौ धृत्वा स्थित इति कर्णनाम्ना वृद्धिं गतः । इति निरूपिते हृष्टः पवनवेगः ।

ततोऽन्यस्मिन् दिने बौद्धवेषेण गत्वा दक्षिणपूर्वस्यां दिशि स्थितगोपुरे तत्क्रमेणोपविष्टौ । तथैव संभाषणे कृते विप्रैः को गुरुः, किं तपश्चरणकारणमिति पृष्टे, नावयोर्गुरुर्विद्यते । गुरुं विना कथं तपः । कथयितुं नायाति । किमिति । क्षीरकथाकरणभयात् । सा कीदृक्षा ।

सागरदत्तो नाम वणिक् नालिकेरद्वीपं व्यवहारार्थं गतः । सह नीताया गोर्दधि तदधीशतोमराय दत्तम् । तेन चोक्तम् । किमर्थमिदम् । वणिजोक्तम् । भोजनार्थम् । भुक्ते तस्मिन् तोमरेणोक्तम् । कस्मादिदं रसायनमानीतं त्वया । वणिजोक्तम् । मम कुलदेवतया दीयते । सा मह्यं दातव्या । वणिजोक्तम् । न । पुनस्तोमरेणोक्तम् । यत्त्वया प्रार्थ्यते तन्मया दीयते इति । महताग्रहेण याचिता गौर्यावदिष्टं तावद् द्रव्यं गृहीत्वा दत्ता । तेन स्थापिता स्वगृहे । भोजनवेलायां तस्या भाण्डं प्रदर्श्य याचितं रसायनम् । सा मौनेन स्थिता । एवं द्वितीयदिने तृतीयेऽपि याचिते अदाने सति तद्गुणमजानता संकुप्य निःसारिता । एवमेव तु यो यद्गुणं न जानाति स तेन किं करिष्यति । तदुक्तम् ।

गुणा गुणज्ञेषु गुणीभवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः ।
सुस्वादु तोयं भवतीह नद्याः समुद्रमासाद्य भवन्त्यपेयम् ॥

एवंविधः कोऽपि न विद्यते । कथय । अगुरुकथाकरणे बिभेमि । सा किंलक्षणा । मगधदेशे राजगृहे राजा गजरथः । तत्रैकः कुटुम्बी हरिमेघहरः । तदपत्यं हलिः । मृते पितरि हलिना धावनेऽभ्यासः कृतः । जिताभ्यासो भूत्वा सिंहद्वारे राजसेवां करोति । एकदा राजा बाह्यालयर्थं गतः दुष्टाश्वेन वनं नीतः । स्थिते परिजने हलिः सहगतः । राज्ञा दृष्ट्वा पृष्टः । कस्त्वमिति । तेनोक्तम् ।

तव भृत्यो ऽहम्। तदनु शुश्रूषां कुर्वन् स्थितः। अभ्रमार्गेणागते परिजने राजा विभूत्या पुरं प्रविष्टः। तदनु हलियोग्यम् उक्तं राज्ञा। रे पञ्चशतग्रामान् गृहाण। तेनोक्तम्। मातरं पृष्ट्वा गृह्यते। तदनु पृष्टया मात्रा गदितम्। हे पुत्र, त्वमहं चोभौ। एवं गृहीतेषु ग्रामेषु चिन्तां कः करिष्यति। यदि राजा तुष्टस्तर्हि सुभूमिक्षेत्रमेकं गृहाण। एवं करोमीति राजसमीपं गत्वा याचिते क्षेत्रे राज्ञोक्तम्। हे अकृतपुण्य, ग्रामान् गृहाण। तेनोक्तम् परिचिन्ताकारकाभावात् न गृह्यन्ते। सति द्रव्ये सर्वं भविष्यति। गृहाण। न। सर्वैर्भणितम्। पुण्यहीनस्य संतुष्टो राजा किं करोति। तथा चोक्तम्।

न हि भवति यन्न भाव्यं भवति च भाव्यं विनापि यत्नेन।
करतलगतमपि नश्यति यस्य च भवितव्यता नास्ति ॥ इति।

तथापि राज्ञा करुणया तस्मा अगुरुचन्दनं दत्तम्। तेन चिन्तितम्। अहो, यो राजा सुक्षेत्रं दातुमसमर्थः स किं पञ्चशतग्रामान् दास्यति इति। तेन तद्वनं सर्वं छेदयित्वा संशोष्य प्रज्वालितम्। कियत्सु दिनेषु राज्ञा तद्वनं किं कृतमिति पृष्टः। तेनोक्तम्। छेदयित्वा दग्धमिति। पुनरुक्तं राज्ञा। तत्र किंचिदुद्वृतं विद्यते नो वा। तेनाभाणि। अर्धदग्धानि काष्ठानि सन्तीति। राज्ञोक्तम्। एकमानय। आनीतम्। इदानीं त्वापणे विक्रीणीथाः। तथा कृते बहु द्रव्यं दृष्ट्वा कृतः पश्चात्ताप इति। न तथा को ऽपि। मा भैषीः। कथय।

विक्रमपुरे वणिक्पुत्रावावाम्। आवयोः पिता बौद्धभक्तः। आवां बौद्धनिकटे पठावः। एकस्मिन् दिने अकालवृष्टिर्जाता। गुरोः संस्तरस्योपरि उदकस्रवणे जाते तच्छोषणार्थं समीपस्थ-पर्वतस्योपरि गतौ। शोषणसमये द्वाभ्यां सृगालाभ्यां पर्वतमुत्सार्यान्यत्र द्वादशयोजने नीत्वा स्थापितः सः। गतयोस्तयोरावां तदुपकरणानि गृहीत्वा बौद्धवेषेण भ्रमन्तावत्रागतौ इति तपोनुष्ठानकारणं भणितम्। अहो वैचित्र्यं रक्ताम्बरवचसः कथम्। अल्पसत्त्वाभ्यां किं पर्वतमुत्सार्य द्वादशयोजनेषु निक्षिप्यते। किं भवत्पुराणे प्रसिद्धमिदं न भवति। यदि भवति, कथय। कथ्यते।

रामायणे सीताहरणे जाते शुद्धौ च सत्यां लङ्कागमनोपायः क इति सचिन्तो रामः। मर्कटैर्भणितः। मा चिन्तां कुरु। सर्वमस्माभिः क्रियत इति। पर्वतानुत्सार्यानीय तैः सेतुर्बद्ध इति। उक्तं च।

एते ते मम बाहवः सुरपतेर्दोर्दण्डकण्डूपहाः
सो ऽयं सर्वजगत्पराभवकरो लङ्केश्वरो रावणः।
सेतुं बद्धमिमं शृणोमि कपिभिः पश्यामि लङ्कां वृतां
जीवद्भिस्तु न दृश्यते किमथवा किं वा न वा श्रूयते ॥

इति सत्यं विद्यते नो वा। न विद्यते इति केन भण्यते। यद्येवं तर्हि वानराणां भूधरोद्धरण-मुचितं न शृगालयोरिति कथं श्लाघ्यम्। इति बहुधा जित्वोद्यानं गतौ। पवनवेगेन पृष्टो मनोवेगः। कथं रामलक्ष्मीधरयोर्लङ्कागमनमिति। स आह। हे मित्र, अस्मिन् भरते उत्सर्पिण्यवसर्पिण्यौ समे प्रवर्तेते। तयोः प्रत्येकं षट्कालाः प्रवर्तन्ते। तत्रेयमवसर्पिणी। अस्यां षट्कालाः सन्ति। ते च के। सुषमः, सुषमसुषमः सुषमदुष्षमः, दुष्षमसुषमः, दुःष्षमः, अतिदुष्षमश्चेति। तत्र चतुर्थकाले त्रिषष्टिशलाकापुरुषाः स्युः। ते च के। चतुर्विंशतितीर्थंकराः। किंनामानः। वृषभः, अजितः, संभवः,

अभिनन्दनः, सुमतिः, पद्मप्रभः, सुपार्श्वः, चन्द्रप्रभः, पुष्पदन्तः, शीतलः, श्रेयान्, वासुपूज्यः, विमलः, अनन्तः, धर्मः, शान्तिः, कुन्थुः, अरः, मल्लिः, मुनिसुव्रतः, नमिः, नेमिः, पार्श्वः, वर्धमानश्चेति। एते सर्वे मुक्तिगामिनः। द्वादश चक्रवर्तिनः। ते च के। भरतः, सगरः, मघवा, सनत्कुमारः, शान्तिः, कुन्थुः, अरः, सुभौमः, पद्मः, हरिषेणः, जयसेनः, ब्रह्मदत्तश्चेति। एषां मध्ये अष्टौ मुक्ति गताः। ब्रह्मदत्तसुभौमौ सप्तमनरकं गतौ। मघवासनत्कुमारौ स्वर्गं गतौ। नव बलदेवाः। विजयः, अचलः, सुधर्मः, सुप्रभः, सुदर्शनः, नन्दी, नन्दिमित्रः, रामः, पद्मश्चेति। अष्टौ मुक्तिगामिनः। पद्मः ब्रह्मस्वर्गं गतः। नव वासुदेवाः। त्रिपिष्टः, द्विपिष्टः, स्वयंभूः, पुरुषोत्तमः, पुरुषसिंहः, पुण्डरीकः, दत्तः, नारायणः, कृष्णश्च। तेषां मध्ये एकः सप्तमं नरकं, पञ्च षष्ठं नरकं गताः। एकः पञ्चमनरकं गतः। एकश्चतुर्थम् अपरस्तृतीयम्। एते कथमाराध्याः। नव प्रतिवासुदेवाः। अश्वग्रीवस्तारकः, मेढको, मधुकैटभः, निशुम्भः, बलिः, प्रहरणः, रावणः, जरासन्धश्चेति। एते स्वकालवासुदेवाः यत्र नरके गताः इति त्रिषष्टिशलाकाः पुरुषाः। एकादश रुद्रा भवन्ति। के ते। भीमः, बलिः, जितशत्रुः, रुद्रः, वैश्वानरः, सुप्रतिष्ठः, अजितारिः, पुण्डरीकः, अजितधरः, अजितनाभिः, प्रतालः, सात्यकिः, पुत्रश्चेति। एते निर्ग्रन्थलिङ्गधारिणः। दशमपूर्वाध्ययने भग्ना भवन्ति। एतेषां मध्ये द्वौ सप्तमनरकं गतौ। पञ्च षष्ठं, एकः पञ्चमं, द्वौ चतुर्थम् अपरः तृतीयं गतः। इति कथमेते वन्द्याः। तत्राजितनाथकाले भरतक्षेत्रविजयार्धपर्वतदक्षिणश्रेणौ रथनूपुरचक्रवालपुराधीशपूर्णघनस्य पुत्रस्तोयदवाहनः। तस्मै पूर्वभवस्नेहेन भीमराक्षसनामव्यन्तरदेवेन लङ्काद्वीपमध्ये स्थितं लङ्कापुरं, राक्षसी विद्या, नवमुखकण्ठाभरणं च दत्तम्। ततस्तस्य तोयदवाहनस्य कुलं राक्षसकुलं जातम्। तत्संताने बहु गतेषु उत्पन्नो धवलकीर्तिः। तेन विजयार्धपर्वतदक्षिणश्रेणिमेघपुराधीशात्तोदूयस्य पुत्रः श्रीकण्ठः। तनुजा देविला परिणीता। तेन च श्रीकण्ठाय वानरद्वीपो दत्तः वानरी विद्या च। ततस्तस्य श्रीकण्ठस्य श्रीकुलं वानरकुलं जातम्। रावणो राक्षसकुले उत्पन्न इति राक्षसो भण्यते। न निशाचरः। सुग्रीवादयस्तु वानरकुलोद्भवाः। न तु स्वयं वानराः। ते च आकाशगामिनीप्रभावेण लङ्कां गताः। न तु सेतुं बन्धयित्वेति। अन्यत् सर्वं पद्मचरित्रे ज्ञातव्यम्।

इति स्वसमयप्रसिद्धरामायणनिरूपणप्रवणैर्वचनैस्तद्वंशोत्पत्ति प्रतिपाद्य मित्रस्य चित्तं प्रह्लाद्य परस्मिन् दिने श्वेताम्बरवेषेण गत्वा ऐशान्यां दिशि गोपुरे द्वारेण तत्क्रमेणोपवेशने संभाषणे च जाते [illegible]। को गुरुः। किं तपश्चरणकारणम्। श्वेतपटेनोक्तम्—नावयोर्गुरुरस्ति। तद्विना कथं तपः। किं रजकचन्दनकथा न विधीयते। सा किंरूपा। स आह।

उज्जयिन्यां राजा शान्तनामा। तस्य महान् दाहज्वरो जातः। वैद्यप्रतिकारे उल्लंघिते राज्ञा यो मदीयं ज्वरमपहरति तस्मै अभीष्टं दीयते। आज्ञा दत्ता वणिजैकेन धृता। तदनु वणिक् शीतलद्रव्यावलोकनार्थं प्रदेशं गतः। तत्र वस्त्राणि प्रक्षालयता रजकेन नदीरयेणागतं गोशीर्षचन्दनकाष्ठमिन्धनार्थं[illegible] तटे निक्षिप्तम्। भ्रमता तेन वणिजा दृष्टम्। ज्ञात्वा तस्मै काष्ठभारमेकं दत्वा संगृह्य तत्सामर्थ्येन राज्ञो ज्वरमपसार्य राज्ञो ऽभीष्टं गृहीतमिति। किमीदृशः को ऽपि विद्यते। कथय। किं मूर्खचतुष्टयकथाकारको नरो न विद्यते। तत् कीदृशं मूर्खचतुष्टयम्। कथ्यते मया।

चतुर्भिः पुरुषैर्मार्गे गच्छद्भिः संमुखमागच्छन् मुनिर्दृष्टः। तदनु नमस्कारे कृते मुनिना वारमेकं धर्मवृद्धिरस्त्वित्युक्तम्। चतुर्भिरपि कियदन्तरं गत्वा चिन्तितम्। अहो, अस्माभिः सर्वैर्नमस्कारे कृते मुनिना एकैव धर्मवृद्धिर्दत्ता। सा कस्यात्र भवति। मम ममेति झगटके कृते सर्वैः

पर्यालोचितम्। मुनिः प्रष्टव्यः। तेन यस्मै दत्ता तस्मै भवत्विति। मुनिं पृष्टवन्तः कस्मै धर्मवृद्धिर्दत्तेति। मुनिनात्मनो रक्षणार्थं योऽतिमूर्खः तस्मै दत्तेति भणित्वा गतम्। ते ऽप्यहमहं मूर्ख इति वादेन नगरमागताः। तत्र सभां मेलयित्वा अस्माकं विवादः स्फेटनीय इति मुद्रापणे दत्ते सभास्थैः को विवाद इति पृष्टाः। कथिते स्वरूपे मध्यस्थैरुक्तम्—आत्मीयमात्मीयं मूर्खत्वं प्रतिपादयत। तत्रैकेनाभाणि।

एकस्मिन् ग्रामे ऽहं ग्रामकूटकः। मम द्वे भार्ये स्तः। एकस्यां रात्रौ एकस्मिन् एव शयनतले भार्ययोर्मध्ये उत्तान उभयोरुपरि हस्तौ निधाय सुप्तः। तावदाखुना वर्ति गृहीत्वा गच्छता मम लोचनस्योपरि पातिता वर्तिः। तच्छिखया दह्यमाने ऽपि लोचने उभयोर्मध्ये कस्यांचिदुपरि स्थितं हस्तम् आकृष्यापसार्यते चेत् प्रेमभङ्गो भविष्यतीति मत्वा सहमानः स्थितः। दुर्गन्धात् ज्ञात्वा ताभ्यां स्फेटिता। तदनु स्फुटिते लोचने। सर्वैर्विषमलोचन इति नाम कृतम्। एतन्मे मूर्खत्वम्। परः प्राह। तन्मौर्ख्यं श्रृण्वन्तु।

एकस्मिन् ग्रामे अहं मुख्यभूतपुरुषः। ममापि द्वे भार्ये। खरी रिंछो च। ताभ्यां यथाक्रमं मम दक्षिणवामपादयोर्नवनीतेन मर्दनं विधीयते। एकस्मिन् दिने खरी दक्षिणपादमर्दनं कृत्वा जलानयनार्थं गता प्रविष्टा। अनु रिंछया वामपादं दक्षिणस्योपरि निधाय गता। आगतया खर्या दृष्ट्वा मम पादस्योपरि स्वकीयं पादं निक्षिप्य निकृष्टा गतेति कोपात् मुसलेनाहत्य मोटितः पादः। तत्रागतया रिंछया द्वितीयोऽपि भग्नः। तदनु सर्वैः खञ्ज इति नाम कृतम्। तृतीयो ब्रूते। मम मूर्खत्वमवधारयन्तु।

एकस्मिन् ग्रामे कूटकपुत्रो ऽहम् अपरस्मिन् ग्रामे ग्रामकूटपुत्री परिणीता मया। एकदा स्वग्रामात् श्वशुरग्रामं गच्छतो मे माता बुद्धिर्ददौ। कथं तत्राभिमानित्वमवलम्बनीयम्। हे पुत्र, भोक्तुमागच्छेरित्युक्ते वचनेनैकेन न भोक्तव्यम्। भोजने च स्तोकं भोक्तव्यं स्तोकं त्यजनीयमिति। एवं करोमीति गतो ऽहं श्वशुरग्रामम्। सन्मानपूर्वकं गृहं प्रविष्टः। अपराह्णवेलायां श्वश्र्वा भोक्तुमाहूतः। मयोक्तम्। क्षुधा नास्ति। द्वितीये दिने तथा चोक्ते महत्याग्रहे कृते। क्षुधा नास्तीति स्थितः। जामाता न भुङ्क्त इति श्वश्रूः सचिन्ताभूत्। अनु शालितण्डुलान् पिठरकस्थितोदकमध्ये निक्षिप्य मम भार्यायाः तथा प्रतिपादितम्। यदैव तव भर्तुः क्षुधा भवति रात्रौ तदैव रन्धित्वा भोजनं प्रयच्छेरिति। एवं करोमीति तया मे मञ्चकस्याधो निक्षिप्ता पिठरी। रात्रौ क्षुधया मे प्राणेषु गच्छत्सु सत्सु प्रिया प्रस्रवणं कर्तुं बहिर्गता। तदैव मया तण्डुलान् गृहीत्वा मुखं भृतम्। चर्वणे क्रियमाणे आगतया भार्यया भणितं किं कुर्वन् तिष्ठसीति। गदितो ऽपि तदाहं वक्तुं नायातीति तूष्णीं स्थितः। तदनु तया मे मुखं दृष्ट्वोक्तम्। नष्टाहं, भर्तुर्व्याधिरभूत्। मात्रे निरूपितम्। महाकोलाहलो ऽभूत्। तदा लज्जया तण्डुला मया न गिलिताः। प्रातरहं कस्मैचिद् वैद्याय दर्शितः। श्वश्र्वा तस्य दर्शितो ऽहम्। तेन मे ओष्ठयोः पिष्टमवलोक्य तण्डुलचर्वणं जानतापि भणितम्। विषमो व्याधिः। एतत्पुण्यादहमागत इति यथेष्टं द्रव्यं गृहीत्वा मे कपोलौ भेदयित्वा तण्डुलानाकृष्य जनानां प्रदर्शिताः। भणति च। अयं तण्डुलव्याधिः। तदनु अहं गल्लस्फोटको जातः। इति मदीयं मूर्खत्वम्। चतुर्थो बभाण। इदानीं मे मूर्खतामवधारयन्तु।

एकस्मिन् ग्रामे अहं पामरः सुखेन स्थितः। एकस्यां रात्रौ भार्यया सह जल्पन् स्थितः। तदवसरे ऽन्तश्चौरः प्रविष्टः। स यावदावां निद्रां कुर्वस्तावदसंबलः स्थितः। वचने जातालस्येन

मया भार्यया सह भणितम्। आवयोर्मध्ये यो भणति स पञ्चापूपान् सघृतशर्करान् ददाति इति। प्रतिपन्नमुभाभ्याम्। तदनु चौरो दम्पती दुराग्रहग्रस्ताविति संचिन्त्य वस्त्राभरणादिकमाकृष्य मम भार्याकटिस्थं वासः यावद् गृह्णाति तावत्तयोक्तम्। चौर सर्वं गृहीत्वा यास्यति। किं मौनेन तिष्ठसि। मयोक्तम्। जल्पितं त्वया। पञ्चापूपान् देहीति हस्ते धृता। तदनु स गतः। सर्वैः भणितम्। ग्रहिलो ऽयम्। चौरबन्धुरिति। चतुर्णां मूर्खत्वमवधार्य सर्वैरुक्तम्।

'आहारनिद्राभयमैथुनानि समानमेतत्पशुभिर्नराणाम्।
ज्ञानं नराणामधिको विशेषः ज्ञानेन हीनाः पशुभिः समानाः॥'

इति वचनाद्यूयं पशवः। युष्माकं जयपराजयव्यवस्थाम् इन्द्रो ऽपि कर्तुमसमर्थः। कुतो वयमिति श्रुत्वा द्विजैर्भणितम्। किमीदृग्विधाः सन्त्यत्र। सर्वे विचारका एव। कथयात्मीयं वृत्तान्तम्। स प्राह।

गुर्जरदेशे वंशद्रुहनगरे आविको मोहणः। तदपत्ये आवाम्। एकस्मिन् दिने अजारक्षणे गतौ। अटव्यां पक्वफलसंभृतो वृक्षः कपित्थो दृष्टः। तत्फलास्वादनलम्पटावावां चटितुमसमर्थौ। मयोक्तम्। हे भ्रातः, त्वमजा गृहीत्वा गच्छ। अहं फलानि गृहीत्वागच्छामि। ततो गते तस्मिन् मया स्वशिरश्छेदनं कृत्वा वृक्षस्योपरि निक्षिप्तम्। तत् फलानि भक्षयति। अधः स्थितमुदरं तृप्तिं बिभर्ति। उदरपूर्तौ सत्यां कियन्ति तानि भूमौ निक्षिप्य कबन्धस्योपरि पातितं शिरः लग्नं च। फलानि गृहीत्वा यावद्गच्छामि तावदयमेकस्मिंस्तरुतले सुप्तो दृष्टः। उत्थापितः पृष्टश्च। क्वाजा इति। अहं निद्राभिभूतः सन् सुप्तः कथं जानामि। मयोक्तम्। तर्हि फलानि भक्षय। पश्चादवलोकयन्ते। तथा कृते दर्शनाभावाद् गृहं गन्तुं भीतौ श्वेताम्बरवेषान्वितौ देशान्तरं गच्छावः इति पर्यालोच्य भ्रमितुं लग्नाविदानीमत्र समायातौ। तपोहेतुर्भणितः। श्रुत्वा द्विजैरुक्तम्। अहो विचित्रं तपस्विनो वचनमसत्यम्। कृतकतपस्विनोक्तम्। कथमसत्यम्। शिरश्छेदने जीवनम्। तथा शिरसा तेषु भक्षितेषु उदरपूर्तिः पुनस्तत्संधानं च विरुद्धम्। किं भवन्मते एवंविधं नास्ति। अस्ति चेद् ब्रूहि। तत्कथ्यते। कैलासे महेश्वरस्याराधनं तपश्चरणपूर्वकं रावणेन कृतम्। तथापि हर्षं न गच्छति। तदनु नर्तनं कुर्वन् मध्ये मध्ये एकमेकं शिरश्छित्त्वा तत्पादावर्चयति स्म। एवं सर्वेष्वपि तेषु ढौकितेषु तुष्टः शङ्करः याचितं दत्तवान्। रावणः स्वशिरसां संधानं कृत्वा स्वपुरं गत इति। किमेतत्सत्यमसत्यं वा। सत्यम्। एवं तर्हि रामबाणेन मरणं कथं जातम्। तर्हि तस्य दशानां शिरसां संधानमुचितम्। अस्मदीयस्यैकस्येति कथं श्लाघ्यम्। तथा चापरा कथा।

कस्मिंश्चिद् ग्रामे कश्चिद् ब्राह्मणः। तत्पुत्रः शिरोमात्रं दधिमुखः। पित्रैकदा द्विजाः आमन्त्रिताः। तैश्च भुक्त्वा गच्छद्भिः दधिमुखस्याशीर्वादो दत्तः। तेनोक्तम्। धन्यो ऽहम्। मम गृहे विप्रैर्भुक्तमिति। तैरुक्तम्। तव गृहं नास्ति। कथं धन्यो ऽसि। तेनोक्तम्। धन्यो ऽहम् पितृगृहं पुत्रस्य किं न भवति। तैरुक्तम्। न। 'गेहिनी गृहमुच्यते' इति वचनात्। तदनु दधिमुखेन पिता भणितः। मम विवाहं कुर्विति। महत्याग्रहे कृते पित्रा विवाहितः। तदनु भोगवान् जातो द्रव्यक्षयं करोतीति पित्रा निर्घाटितः। स चात्मानं शिक्ये निक्षेपयित्वा स्वब्राह्मण्या ग्राहयित्वा देशान्तरं गतः। स चैकदैकं पुरं प्रविश्य द्यूतस्थानं दृष्ट्वा हृष्टः। आत्मानं तत्रैव निधाप्यावलोकयन् स्थितः। सा क्वापि गता। तदवसरे उभयोर्द्यूतकरयोः कलहो जातः। एकेनैकस्य शिरः खड्गेनाहतं पतितम्। तदनु कबन्धे दधिमुखेनात्मीयं शिरः संधितमिति। तथापरापि।

राजगृहे राजा चन्द्ररथः। तस्य द्वे भार्ये। तयोः पुत्राभावादीश्वराराधनं कृतम्। तेन च तुष्टेन तस्मा औषधगुटिका एका दत्ता। या इमां भक्षयति तस्याः पुत्रो भविष्यति इति। तां गृहीत्वागतेन राज्ञा चिन्तितम्। यद्येकस्यै दीयते अपरा दुःखिनी भाविनी इति द्वावंशौ कृत्वा उभाभ्यां दत्तवान्। तयोर्गर्भे स्थिते नवमासावसाने प्रसूतौ सत्याम् उभयोः पुत्रस्यार्धद्वयं जातम्। महेश्वरेण दत्तोऽप्येवंविधः पुत्रः किं क्रियते। अप्रयोजकत्वात् अर्धद्वयं श्मशाने निक्षिप्तम्। तत्र गोमयं गृह्णन्त्या जरासंज्ञया वनितया मेलापितम्। ततो जरासन्धनामासुरो जात इति।

तथान्यापि—ईश्वरस्य गौर्या सह दिव्यवर्षसहस्रानवरतं क्रीडाकरणे देवा यद्येवंविधायां क्रीडायां पुत्रो भविष्यति, स महानसुरो भविष्यतीति सचिन्ता बभूवुः। इति सर्वैः पर्यालोच्य गौरीभ्रातान्गिः प्रार्थितः। त्वं महेश्वरसुरतगृहं गच्छ, येन सा लज्जयोत्थाय गच्छतीति प्रार्थनावशात् स गतः। सा तं दृष्ट्वोत्थिता। तदनु कुपितो हरः भणति। हे निकृष्टवीर्य, क्षरणावसरे किमित्यागतोऽसि। इदानीं किं भूमौ पातो विधीयते। स्वमुखं प्रसारय। नो चेत् त्वं जानासीति तर्जिते प्रसारितं तेन। तत्र तत्पातयति स्म। तदुक्तम्।

> रेतसा यदि रुद्रेण तर्पितो हव्यवाहकः।
> मानवैस्तन्न कर्तव्यं न देवचरितं चरेत्॥ इति।

तत्सामर्थ्यमसहमानः कुष्ठी जातो ऽनलः। एकस्मिन् ग्रामे गङ्गादयः षड् ब्राह्मणपुत्र्यो ऽग्नेरुपासनं कुर्वन्त्यः स्थिताः। तासामङ्गं दृष्ट्वा तत्र क्षिप्तम्। षण्णां षडंशा उत्पन्नाः। तत उद्याने निक्षिप्ताः केनचिन्मेलापिताः। ततः षण्मुखः संजात इति। एताः सर्वाः कथाः सन्ति नो वा। सत्यं सन्ति। तर्हि शिरस्सु छिन्नेष्वपि रावणस्य जीवनम्। भिन्नपुरुषकबन्धे दधिमुखशिरस्संधानम्। अन्यमतान्न्‍या... अर्धं संधानं चोचितं न मम जीवनं संधानं चेति कथमुचितम्॥

भवत्वेतत्सर्वम्। कथं दूरस्थेन शिरसा भक्षितेषु फलेषु उदरं तृप्यति। किं भवदागमे नास्ति। नास्ति। त्वया ज्ञायते चेत् कथय। कथयामि।

> मत्स्यः प्रीणाति द्वौ मासौ त्रीन् मासान् हरिणो मृगः।
> शकुनिश्चतुरो मासान् पञ्च मासांश्च हूरवः॥
> शशः प्रीणाति षण्मासानश्वः सप्त तु एव च।
> अष्ट मासान् वराहेण मेषो मासान्नवैव च॥
> महिषो दश मासांश्च पशुरेकादशः स्मृतः।
> संवत्सरं तु गर्भिण्यां पशूनां पायसेन वा॥

इति वचनात्। इह मत्स्यादिमांसे ब्राह्मणेभ्यो दत्ते सति स्वर्गस्थाः पितरः कथं तृप्यन्ति। तैरवादि। ब्राह्मणानां कुलमाहात्म्यात्। तेनोक्तम्। कोऽयं ब्राह्मणो नाम। किं शरीरम्। किं जातिः। किं जीवः। किं कुलम्। किं योनिः। किं ज्ञानम्। किं शौचाचारः। किं तपः। किं संस्कारः। इति गत्यन्तराभावात्। न तावत् शरीरम्। क्षत्रियादीनां साधारणत्वात्। किं च मृतस्य ब्राह्मणस्य शरीरदहने बन्धूनां ब्रह्महत्यादिरपि स्यात्। तथा जातिरपि ब्राह्मणो न भवति। तस्या अपि साधारणत्वात्। सा साधारणेति कथं ज्ञायते। यथा गोमहिष्यादीनां परस्परं गमने ऽपत्यादर्शनात्तद्भेदो ज्ञायते। न तथा चाण्डालब्राह्मणादीनां भेदः। परस्परं गमने गर्भदर्शनात्।

किं च यदि जातिः ब्राह्मणः सा च नित्या ब्राह्मणैरभ्युपगता। न च ब्राह्मणस्य ब्राह्मणत्वं नित्यम्। उक्तं च मानवे धर्मशास्त्रे।

सद्यः पतति मांसेन लाक्षया लवणेन च।
त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयी॥
इतरेषां तु पुण्यानां विक्रयादिविकल्पनात्।
ब्राह्मणस्त्वेकरात्रेण वैश्यभावं तु गच्छति॥
वृषलीफेनपीतस्य निःश्वासोपहतस्य च।
तत्रैव प्रसूतस्य निष्कृतिर्नोपलभ्यते॥
ऋतुकालमतिक्रम्य यो ऽभिगच्छति मैथुनम्।
स भवेद् ब्रह्महा नाम हतस्तेन निजात्मकम्॥
ऋतुकाले व्यतिक्रान्ते यस्तु सेवेत मैथुनम्।
ब्रह्महत्याफलं तस्य सूतकं च दिने दिने॥

इति वचनात् ज्ञायते जातिः ब्राह्मणो न भवतीति। जीवो ऽपि ब्राह्मणो न भवति। स्मृतिवचनप्रामाण्यात्। किं तद्वचनम्।

अधीत्य चतुरो वेदान् साङ्गोपाङ्गान् सलक्षणान्।
शूद्रात् प्रतिग्रहं कृत्वा खरो भवति ब्राह्मणः॥
खरो द्वादश जन्मानि षष्टिजन्मानि सूकरः।
श्वानः सप्ततिजन्मानि इत्येवं मनुरब्रवीत्॥

इति वचनात् जीवो ऽपि न ब्राह्मणः। कुलमपि ब्राह्मणो न भवति। मुनीनां कुलस्य दोषप्रसंगात्। तद्यथा।

हस्तिन्यामचलो जातः उलूक्यां केशकम्बलः।
अगस्त्यो ऽगस्त्यपुष्पाच्च कौशिकः कुशसंस्तरात्॥
कठिनात् कठिनो जातः शरगुल्माच्च गौतमः।
द्रोणाचार्यस्तु कलशात् तित्तिरस्तित्तिरीसुतः॥
रेणुकाजनयद्रामं ऋष्यशृङ्गं वने मृगी।
कैवर्ती जनयेद् व्यासं कपिलं चैव शूद्रिका॥
विश्वामित्रं च चाण्डाली वसिष्ठं चैव उर्वशी। श्वपाकी पारासरम्।
न तेषां ब्राह्मणी माता ते ऽपि लोकस्य ब्राह्मणाः॥

इति वचनात् न कुलं ब्राह्मणः। ब्राह्मणानां प्रादुर्भाविका योनिरपि न ब्राह्मणः। तत्कथम्—

जन्मना जायते शूद्रः क्रियया द्विज उच्यते।
श्रुतेन श्रोत्रियो ज्ञेयो ब्रह्मचर्येण ब्राह्मणः॥

तथा उक्तं च वेदे।

मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रियास्तथा।
ऊरुभ्यां वैश्यजातिश्च पादाभ्यां शूद्रजातयः॥

एवं भगिनीसंसर्गो ऽपि भवेत् ब्राह्मणानामेकपुरुषसंभवत्वात् ब्राह्मण्या इति। ततो ऽपि ज्ञायते योनिरपि न ब्राह्मण इति। अन्यच्च। शूद्रा एव नमस्करणीया न च ब्राह्मणाः। कुतः। पादयोर्न क्षरणात्। ज्ञानम् अपि न ब्राह्मणः। तस्य क्षत्रियादिष्वपि दर्शनात्। शौचाचारो ऽपि न ब्राह्मणः। स्मृतेः प्रामाण्यात्।

आरम्भे वर्तमानस्य ब्राह्मणस्य युधिष्ठिरः।
हिंसकस्य कुतः शौचं मैथुनाभिरतस्य च॥

इति वचनात् ज्ञायते शौचाचारो ऽपि न ब्राह्मण इति। किं च तस्य साधारणत्वात् सर्वे ऽपि ब्राह्मणाः स्युः। तपो ब्राह्मणश्चेत् सिद्धसाधनम्। कुतः तपोमूलत्वादिष्टार्थसिद्धेः। संस्कारो ऽपि न ब्राह्मणः। गर्भाधानं मासे भवति। पुंसवनं चतुर्मासेषु, उत्पन्ने नवमे मासे जातकर्मादि प्रसिद्धम्। उत्तानं दशमे दिने नामकरणं प्रसिद्धम्। परिनिष्क्रमणं गृहाद्बहिर्निष्कासनम्। आयुष्म वयः (?) मासे अन्नप्राशनं प्रसिद्धम्। चौलोपः मुण्डनम्। उपनयनं विदितम्। समावर्तनम् अध्ययनादि शिक्षा। पाणिग्रहणं प्रतीतम्। यज्ञो विदित एव। दहनं मृते सति शरीरप्रज्वलनम्। एतेषां षोडशसंस्काराणां साधारणत्वा[त्]। तथा चोक्तम्।

न शौचादिशरीरेण जातिजीवकुलेन च।
तपसा ज्ञानयोन्या च संस्कारैर्न द्विजो भवेत्॥

तस्मात्—

ब्राह्मणो ब्रह्मचर्येण यथा शल्येन शाल्यिकः।
